MADANAKETV'ARITA

RAMAPANIVADA

015:2L40:1 H8

015:2L40:1
H8

015:2L401:1 H8
Ramapanuadi:
MADANAKETU-
CARITAI

160552

MUL
160552

**Madras University Library.**

DOCTRINA VIM PROMOVET INSITAM

Call Number O15: 2L401: 1 H8

Accession Number 160552

Available for loan from

This book should be returned on or before the date last marked below.

11 FEB 1956

1 FEB 1964

13 FEB 1984

O. 61

# MADANAKETUCARITA

OF

RĀMAPĀṆIVĀDA

UNIVERSITY LIBRARY
6- NOV 1953
MADRAS

UNIVERSITY OF TRAVANCORE

PUBLISHED BY

THE CURATOR,

THE UNIVERSITY MANUSCRIPTS LIBRARY.

TRIVANDRUM.

---

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1948.

160552
36832
015:2L401:1
H8

## INTRODUCTION

*The Manuscripts Material.* This edition of the Madanaketucarita, a *Prahasana* in two scenes by Rāmapāṇivāda, which is published for the first time, is based on two palm-leaf Mss. Nos. 163 and 1679 of the Curator's collection in the University Manuscripts Library. Description:

Ms. No. 163. Size. 13" X 1". Leaves—52; 4 lines per page and 40 letters per line. Script – Malayalam.

Ms. No. 1679. Size 10" X 1". Leaves—41; 7 lines per page and 30 letters per line. Script—Malayalam.

The first is collected from Puthiyil House, Haripad, and the second from Ayankudi House, Vaikom, Travancore. The former manuscript is damaged to a certain extent. The latter is in good condition and its date of transcription is 944 M. E. (1768 A. D.)[1]. Of these manuscripts No. 1679 is represented by the letter क and No. 163 by the letter ख in the foot-notes showing variants.

*Author.* In the prologue to this farce the Sūtradhāra tells Pāripārśvika as follows :—

मारिष ! अपि श्रृणोषि मङ्गलग्रामवास्तव्येन रामपाणिवादेन विरचितं मदनकेतुचरितं नाम प्रहसनमस्मद्वशे वर्तत इति ।[2].

From this it is evident that Rāmapāṇivāda of Maṅgalagrāma is the author of the work. This may further be

1. A chronogram at the end of the MS. runs:
തൊള്ളായിരത്തിനാല്പത്തുനാലാമാണ്ട് ചിങ്ങഞായർ [illegible] തീയതി എഴുതിത്തീർന്നു.

2. See page 2.

confirmed by a reference to a metrical list of Rāmapāṇivāda's works in which a *Prahasana* is also mentioned[3].

Rāmapāṇivāda was a great poet of Kerala who enriched various channels of Sanskrit Literature with his works of high literary value in the first half of the Eighteenth Century after Christ[4]. There is a controversy among research scholars regarding his identity with Kuñcan Nampiyār, the author of many *Tullal-Kathās* and other Malayalam works, but this has not yet been finally settled.

*Plot*. Madanaketu is a prosperous monarch of Ceylon, who has conquered Kaliṅga and posted his brother Madanavarman to rule over that country. In Ceylon a Bhikṣu by name Viṣṇumitra leads an ignominious life violating all principles of the religious life which he has chosen for himself. He is over head and ears in love with a courtesan named Anaṅgalekhā and so spends his days yearning to achieve his heart's desire. He himself says :

वसानः काषायं वसनमपिधानं रतिपते-
दधानस्तां चित्ते चकितहरिणीशावनयनाम् ।
वहन् पाणौ दण्डं विषयशफरीजालबलिशं
परीरम्भाशंसी कथमपि नयाम्येष दिवसान् ॥

(Page 3, Sloka 7)

He is so much absorbed in the sweet thoughts connected with his love that he does not feel inclined to move from one place to another as he himself admits.

ध्यायं ध्यायं प्रियां तां पदमपि चलितुं नोत्सहे किं करोमि ।

(Page 5, Śloka 9)

Having come to know about this unrighteous conduct of the Bhikṣu, Madanavarman who sets much store by the maintenance of *dharma* enjoins Śivadāsa, a Kāpālika of extraordinary yogic powers to Ceylon for the purpose of

3. *Vide* Introduction to *Mukundaśataka* in Volume II. No. 2 of this Journal, p. xiv.
4. For a brief account of Rāmapāṇivāda's life and works *vide ibid*, pp. i--xxiii.

generating disgust in the Bhikṣu towards worldly pleasures, thus saving the kingdom from ruin. Madanavarman tells the yogin:

सखे शिवदास !

राज्ये सिंहलभूभुजां नयनिधेरार्यस्य बाहुष्मभि-
स्संगुप्तेऽपि पदं चिकीर्षति किल स्थेयानधर्माङ्कुरः ।
यस्मिन् कामपि बन्धकीमभिलषन्नन्त्याश्रमस्थोऽपि सन्
कश्चिन्माद्यति भूसुरः प्रवक्रयत्यार्यश्च तत्साहसम् ॥

तदेवं सिकताकूपवद्विशीर्येत नो जनपदः । तद् भवानद्भुतप्रकाशन-व्यपदेशेन तस्य योगिनः स्वयमैहिकेषु विरक्तिमुत्पाद्य नः संत्रातुमर्हति ।

(Page 9)

Complying with the request of his friend, Śivadāsa visits the court of Madanaketu and meets the king in person. In the course of their conversation the king discloses to the yogin the deep love that he has felt towards Candralekhā, a harlot of the Dravida country, and the yogin undertakes to see that the king's desire is realised.

Then with the royal permission the chamberlain brings the Bhikṣu, who is held by force by Anaṅgalekhā's, mother to the presence of the king. The woman complains that the Bhikṣu sought union with her daughter against her will, and she leaves the court on getting assurance from the king that her grievance will be redressed. The Bhikṣu who was very violently belaboured does not feel the injury very much owing to his satisfaction at having had an opportunity to be with his love. He says:

कुट्टिन्या दृढमुष्टिकुट्टिकशतैर्निष्पिष्टसन्धीन्यपि
प्रायो नातिरुजं भजन्ति विकसाच्चित्तस्य गात्राणि मे ।
गाढं पीडितवान् हठादपि यतो वक्षोरुहौ वक्षसा
सोऽहं मुग्धदृशो विवृत्तमपि तद्वक्त्राब्जमाघ्रातवान् ॥

(Page 13, Śloka 22)

Further he tells the king that he had gone to Anaṅgalekhā at the behest of Śṛṅgāramañjarī, the queen. The queen

had asked him to fetch Anaṅgalekhā to the king whose love for the courtesan was evident from his addressing the queen in the previous night by the name Anaṅgalekhā. On hearing this the king understands the mischief played by his wife and appreciates her comic mood.

Śivadāsa sets his mind on bringing Candralekhā to the court by his yogic powers. Wishing her to appear on the scene he says allegorically:

अवतरतु धरित्रीमेव राकाशशाङ्कः
पिबतु बकचकोरश्चन्द्रिकामेतदीयाम् ।
अपि च विकचपुष्पा मल्लिका जङ्गमत्वं
व्रजतु भजतु चैनामुत्सुको भृङ्गराजः ॥

(Page 15, Śloka 25)

Then he sits in a contemplating mood. Meanwhile Candralekhā arrives at the court all of a sudden and meets the king and reciprocates his love. The king gets so much infatuated with the courtesan that he feels pity for Śivadāsa, whose eyes remain closed when Candralekhā is present. Then he describes her as follows:

सैवेयं भुवनैकसुन्दरितमा कन्दर्पदर्पद्रुमं
सिञ्चन्ती सुषमामृतेन वपुषश्चित्ताङ्कणे मादृशाम् ।
यामेवालिखदन्तरङ्गफलके सङ्कल्पशिल्पी यथा-
पूर्वं चन्दनचन्द्रमन्दपवना मर्माविधो निर्मिताः ॥

(Page 17, Śloka 27)

Overwhelmed with love the king asks her to embrace him, but she reminds him of the possible estrangement of the queen. Then he boldly tells her:

देवीविरोधमनुशङ्क्य तवाङ्गसङ्ग-
सौख्यं चिराभिलषितं कथमुज्जहामि ।
व्यालीभयेन मलयाचलकन्दरस्थं
को वा पटीरतरुसारमपाकरोति ॥

(Page 19, Śloka 31)

Śṛṅgaramañjarī, hiding herself behind a pillar, is witnessing this love scene. As her patience gets exhausted she approaches the king and puts him to shame by using harsh words born out of jealousy. The king who is thus placed in a very awkward situation finds no means to appease the queen. In this embarassing predicament Śivadāsa comes to his help. He assures the queen that even though the king has taken a fancy for Candralekhā, the queen is the only recipient of his constant love. Moreover he warns her that people around will only be too happy to see any couple estranged from each other. Thus Śivadāsa conciliates Śṛṅgāramañjarī and she agrees to look upon Chandralekhā as her sister. Śṛṅgāramañjarī and Candralekhā embrace each other and the former takes leave to get ornaments ready for the latter. After some time Candralekhā is called in to the inner apartments and provided with toilet and ornaments. And there she waits for her lover Madanaketu.

The Bhikṣu who has grown impatient by this time reminds the king of his own heart's desire and the king in his turn relates the same to Śivadāsa. The Kāpālika, on understanding the Bhikṣu's love affair, wonders at the universal influence of Manmatha:

> कुलं वा शीलं वा विनयमथवा शौर्यमपि वा
> प्रभुत्वं वा न त्वं गणयसि कदाचित्तनुभृताम् ।
> स्वतन्त्रस्त्वं यस्मै नमयसि धनुः पुष्पघटितं
> स तावद्दासत्वं चतुरयुवतीनां वितनुते ॥

(Page 23, Śloka 37)

In order to save the Bhikṣu from sensual life Śivadāsa chalks out a plan with psychological insight. He proposes to make him enjoy to the maximum and thus get disgusted with sensual pleasures. He envisages his plan in the following stanza:

चापल्यस्य परां काष्ठां मयायमनुभाव्यते ।
ततस्संसारभोगेषु विरक्तिं प्रापयिष्यते ॥

(Page 23, Śloka 38)

Then Śivadāsa offers liquor to the Bhikṣu and praises it in glowing terms. The latter shows some reluctance to take the liquor on the plea that it militates against his religious sentiment, but is cowed down by the satirical remark of Śivadāsa:

अनङ्गलेखाधरशीधुपाने
समुत्सुकस्त्वं किल कामलोलः ।
शिवार्चनेऽस्मिन् मदिरोपयोगे
साक्षात् परिव्राडिति युक्तमेतत् ॥

The Bhikṣu drinks the liquor and then the king issues a command, probably in a comic mood, that all his subjects who are pursuing a spiritual life should take liquor and resort to brothels.

ये नाम केचन तपोनिधयो वसन्ति
संसारधर्ममपहाय मदीयराज्ये ।
ते सर्व एव मदिरामनिशं पिबन्तो
मच्छासनेन गणिकासदनं भजन्तु ॥

(Page 24, Śloka 40)

A maid servant announces to the king that Candralekhā is anxiously waiting for him and he takes leave of Śivadāsa to rush to the presence of his love.

Śivadāsa sends for Anaṅgalekhā and on her arriva tells her that the Bhikṣu loves her with all his heart and that she should reciprocate his love and make him happy. Even though a professional prostitute, she refrains from catering to the amorous proclivities of the Bhikṣu for the reason that he is a religious man. In spite of the persuasion

of Śivadāsa she does not prove to be an effective tool for successfully carrying out his own plan regarding Viṣṇumitra. So he sends her away leaving the Bhikṣu a prey to the pangs of unfulfilled love. Śivadāsa too takes leave of the Bhikṣu after giving him sound advice.

कासौ संसारसिन्धोस्सुतरणतरणिर्योगिनामाश्रमस्ते
कामूर्निर्वाणचन्द्रोदयबहुलनिशाः केवलं वेशनार्यः ।
कल्याणं कामयेथाः परिचिनु च सभामुज्ज्वलां सज्जनानां
तीर्थस्नायी दुराशाकलुषितमधुना मानसं वा पुनीहि ॥

(Page 31, Śloka 60)

After some time the king, Śṛṅgāramañjarī, Candrlekhā and Śivadāsa meet together in the palace. Śivadāsa fully realises that Anaṅgalekhā will not serve his purpose to reform the Bhikṣu, for

अपि विशन्ति कृशानुशिखावली-
मपि लिहन्ति महासिलतामुखम् ।
अपि गरं निगिरन्ति न कामिषु
प्रकटयन्ति मनो वनिताजनाः ॥

(Page 33, Śloka 66)

Thereupon Śivadāsa desires to enter by spirit into the body of Anaṅgalekhā and approach the Bhikṣu with aggressive love. In support of this he enunciates the following principle:

स्त्रीमूलस्योपतापस्य स्त्रिय एव प्रतिक्रिया ।
वह्निश्च वह्निमूलस्येत्यामनन्ति मनीषिणः ॥

(Page 33, Śloka 65)

Using his yogic powers he causes Anaṅgalekhā to be bitten by a snake and transfers her soul to the body of some animal. Terribly afflicted by the tragedy the Bhikṣu approaches the king for succour. Śivadāsa leaves the king without any delay and, to the joy and surprise of the Bhikṣu

and all others, Anaṅgalekhā is seen to walk into the king's presence within a very short time. Anaṅgalekhā, of course with the spirit of Śivadāsa, begins to show open protestations of love towards the Bhikṣu who is consequently raised to a state of bliss. He gives graphic expression to his experience as follows :

गात्रे वेपथुमातनोति पुलकश्रेणीं विधत्ते मुहु-
घर्माम्भःकणिकाभिराभिरतुलं बध्नाति मुक्तासरम् ।
कण्ठे गद्गदिकां तनोति वचनव्यापारसंरोधिनी-
मस्याः स्नेहरसप्रसङ्गमधुरा वाणीयमेणीदृशः ॥

(Page 34, Śloka 77)

The courtesan increases the intensity of her aggressive flirting with the Bhikṣu who, by degrees, begins to feel embarassed and reaches a state of indecision as to how he should react to her frivolities. This open courting in the royal presence places the Bhikṣu in a very awkward situation, but in his heart of hearts he still loves Anaṅgalekhā. So he says :

परीरम्भे कुम्भप्रतिभटकुचायाः कुतुकिनं
निरुन्धे मामग्रे भिषदिदमहो भूपतिसभम् ।
स्मरातप्तं चेतो न च मम विलम्बं विषहते
न विद्मः कर्तव्यं किमिति वयमस्मिन् व्यतिकरे ॥

(Page 35, Śloka 80)

None the less Anaṅgalekhā intensifies her courting and tends to be vulgar in speech. This sows the seed of disgust in the Bhikṣu's mind who swears :

बीभत्सन्ते जगति युवतिभ्यः सुमतयः ।

(Page 40, Śloka 83)

Anaṅgalekhā indulges in extremely vulgar speech at which the king, the queen and Candralekhā get wild.

She goes to the extent of taking hold of the Bhikṣu's hand. This experience makes him realize the truth :

संसारभागललितानि यथेप्सितानि
मन्ये तथा न सुखयन्ति वशंवदानि ।
अस्याश्चिराभिलषितोऽपि शरीरसङ्गो
यन्मेऽधुना मनसि न प्रमदं तनोति ॥

(Page 43, Śloka 89)

The king in his fury threatens to behead her. Śṛṅgāramañjarī and Candralekhā prepare to get away from the scene. Viṣṇumitra in his dejected and disgusted mood recalls to his mind the advice given to him by Śivadāsa and avers :

वाराङ्गनाजनविलासपकालजाल-
विप्लोषकर्मणि कृशानुशिखायते या ।
सा योगवृत्तिरतिवृत्तरजस्तमस्का
निर्वाणवर्त्मघटनाय ममानुकूला ॥

(Page 46, Śloka 98)

Thus rejected by the once passionate lover who has realised his folly and betaken himself to religious life, Anaṅgalekhā (with the spirit of Śivadāsa) prepares to go away. But then there arrives Jambhaka with the dead body of Śivadāsa. All present there feel extremely sorry for the unexpected death of Śivadāsa and all of them express their genuine regard for him. Before long Anaṅgalekhā gets away and Śivadāsa's body stands up to the astonishment and joy of all assembled there. Shortly Anaṅgalekhā's mother comes to the king with the dead body of her daughter. Śivadāsa by his yogic powers transfers Anaṅgalekhā's soul back to her body. On her regaining life the king and queen begin to castigate her for the vulgar things she has said to Viṣṇumitra in their presence. Anaṅgalekhā pleads innocence. Without keeping the king and others under

suspense any more Śivadāsa explains his action and justifies it saying :

भूमौ यत्किल सञ्चिनोति दुरितं धर्म्यात् पथः प्रच्युतो
लोकस्तत् खलु भूपतौ परिणमत्यम्भो यथाम्भोनिधौ ।
इत्यालोच्य हिताय ते यतिममुं दुर्मार्गपातोन्मुखं
तत्त्वं बोधयितुं भवाब्धिजलधेरेष प्रयत्नो मम ॥

(Page 54, Śloka 110)

He further says that he was enjoined for the purpose by Madanavarman. Then the king gives a compliment to his brother for his true insight into things and feels grateful towards him. To Śivadāsa the king expresses his feeling of obligation and requests him the pleasure of his company on future occasions. Stressing the importance of good company in this ephemeral life, the king says :

आयुर्नाम नृणां दिनानि कतिचित्सौदामिनीचञ्चलं
.नामी मान्ति मनोरथास्त्रिभुवने सिद्धेष्वनास्थापराः ।
धन्यस्तावदयं क्षणः सहृदयैस्सार्धं प्रसन्नोत्तरैः
संलापामृतपाननिर्वृतधिया लोकेन यो नीयते ॥

(Page 55, śloka 113)

Viṣṇumitra whose religious faith has been revived and stabilised, starts on a pilgrimage to various holy places. The king once again thanks Śivadāsa for fulfilling his heart's desire regarding Candralekhā, for rehabilitating Viṣṇumitra to his spiritual path and for bringing prosperity to the country.

*The Merits of the Play.* As usual to the *Prahasana* type of dramatic compositions, the Madanaketucarita too abounds in elements of comedy and satire. The playwright has even characterised this work as

विनोदनं रामपाणिवादस्य ।

i. e. a diversion of Rāmapaṇivāda. Even though named as *Madanaketucarita* (the story of Madanaketu), this

is mainly, the story of the Bhikṣu, Viṣṇumitra, who hopelessly falls in love with Anaṅgalekhā and gets back to his religious life through the good offices of Śivadāsa. The very idea of a Bhikṣu, who is expected to have renounced the worldly pleasures, going after a harlot is essentially comic in nature. Discarding his religious life and pining for the company of the courtesan the Bhikṣu leads a ridiculous life and at last he becomes a source of fun for the king, queen and others. The Bhikṣu who is anxious to meet Anaṅgalekhā goes to her with the sanction of the mischievous queen and gets insulted at the hands of an old woman. He is charged with adultery and dragged to the presence of the king by the old woman. This is sure to excite the laughter of the audience.

The most comic part in the farce is the scene in which Anaṅgalekhā possessed by Śivadāsa's spirit embarrasses the Bhikṣu by her excessive coquetry which reaches its climax as she takes hold of his hand aggressively. The king, queen and Candralekhā witness this unusually comic scene of the courtesan and Bhikṣu. This has got the effect of a comic interlude. The scene in which Śṛṅgāramañjarī chastises the king caught in the company of Candralekhā has also considerable comic effect.

This *Prahasana* may be viewed as a satire directed against the so-called Bhikṣus and others who pass for religious men. The Bhikṣu is castigated by one and all for his unrighteous life and ridiculous love affair. There is a biting satire in the words of Śivadāsa when the Bhikṣu refuses to take the liquor. He askes the Bhikṣu :

अनङ्गलेखाधरशीधुपाने
　　समुत्सुकस्त्वं किल कामलोलः ।
शिवार्चनेऽस्मिन् मदिरोपयोगे
　　साक्षात्परिव्राडिति युक्तमतत् ॥

(Page 24, Śloka 39)

Even though Anaṅgalekhā, possessed by the spirit of Śivadāsa, is priding over the capacity of women for duplicity, one cannot miss the satiric strain of the stanza :

एकस्याङ्के निहितवपुरप्यन्यमालोकयन्ती
 चिल्लीवल्लीचलनकलया चापरं प्रीणयन्ती ।
नम्रालापैरमृतमधुरैरन्यमाह्लादयन्ती
 नारीनाम्ना जयति हि जगन्मोहिनी कापि शक्तिः ॥

(Page 45, Śloka 97)

There is a suggested satire against the faithlessness of Madanaketu in love matters. In the presence of the queen the king says that he is happier than any of his predecessors, the main factor that contributes to his happiness being the love of the queen who is a "Jewel in the three worlds" (त्रैलोक्यरत्नं). The next moment, as she leaves him, he discloses to Śivadāsa his deep love for Candralekhā.

A Bhikṣu who is mad after a courtesan and a king who is in deep love with another courtesan afford ample opportunity for the elicitation of the erotic sentiment in the farce. The love that is depicted here is predominently sensual in character. The Bhikṣu, who has not yet had the good luck of meeting his love wishes to enjoy her company at least in a dream. But he finds it difficult even to have this pleasure for he does not get a wink of sleep. Consequently he is seen to court sleep with great expectations :

निद्रे! देवि! मृगीदृशः कुचतटात्संव्यानचीनांशुकं
 व्याकृष्टुं तनुमुन्नतस्तनभरानम्रां समालिङ्गितुम् ।
तद्बिम्बाधरमाननं करतलेनोन्नाम्य सञ्चुम्बितुं
 प्रत्यूहस्तव वैमुखी मम परं मात्सर्यमुत्सृज्यताम् ॥

(Page 3, Śloka 6)

The king falls in love with Candralekhā on hearing about her extraordinary beauty and as she arrives in his

court, he actually becomes a slave to her personal charms and gestures of love. Overpowered by love he entreats her :

द्वन्द्वं सुन्दरि! पुण्डरीकमुकुलस्पर्धालु वक्षोजयो-
गाढं वक्षसि निक्षिप द्रुततरं कन्दर्पदग्धस्य मे ।
किञ्चोदञ्चय चञ्चलाक्षि! वदनं चुम्बामि बिम्बाधरं
बिम्बोकद्रविणेन केवलमहं क्रीतोऽस्मि दासोऽस्मि ते ॥

(Page 18, Śloka 30)

Thus it could be seen that love, comedy and satire are blended together in this farce.

As pointed out above, this *Prahasana* affords ample means for pleasure and fun to the audience. But the fact that it is not a comic nonsense should not be lost sight of. While giving enough opportunity to laugh and enjoy, it deals with a definite and rather serious theme. It seeks to reform a degenerate Bhikṣu, to make him totally disgusted with worldly pleasures and to give him faith and conviction in his own religious life. This is mainly achieved by a yogin with unusual spiritual powers and psychological insight. The author was not out to scandalize but to reform. This aspect certainly distinguishes this *Prahasana* from many other *Prahasanas* which merely depict some comic scenes to excite laughter in the audience.

The literary style of the work is highly poetic and it abounds in descriptive and lyrical passages of considerable beauty and appeal. The Bhikṣu's description of the rays of the morning sun is elegant in diction and rich in imagination.

नीरन्ध्रध्वान्तदन्तावलहरिनखरश्रेणयः पद्मवाटी-
सद्मान्तस्सुप्तमत्तभ्रमरकुलवधूसानुबोधप्रदीपाः ।
पूर्वाशावशनागीमुखलिखितपरिस्पष्टसिन्दूररेखाः
कोकीशोकार्णबौर्वानलविपुलशिखा भान्ति भानोर्मयूखाः ॥

(Page 6, Śloka 10)

In his message to Madanaketu, Madanavarman gives an impressive description of the loyalty of the Sāmanta kings and the consequent prosperity in his court.

प्रेङ्खत्काञ्चनशृङ्खलाखणखणध्वानेन लोकत्रयी-
कर्णारुन्तुदकर्कशेन कणशो विन्ध्याद्रिसन्धिच्छिदः ।
अद्योपायनदन्तिनः कटतटश्च्योतन्मदाम्भोझरै-
रावासं परितश्चिराय परिखाचक्रं परिष्कुर्वते ॥

(Page 8, Śloka 14)

In these descriptions long compounds and high-sounding words are used and this is appropriate to the objects described. But the wine, which is sweet and exhilarating, is described in a much more simple style :

प्रोदञ्चत्किलिकिञ्चितव्यतिकरे सिद्धौषधं योषितां
मुख्यं संवननं पुनर्भगवतः साक्षाद्भवानीपतेः ।
पीयूषेण समं पुरा विमथिताद् दुग्धाम्बुधेरुत्थितं
तत्राहुर्मदिराभिधं मदपदं किञ्चित्पदार्थान्तरम् ॥

(Page 23, Śloka 38)

In lyrical passages the style becomes more lucid, attractive and musical. This is but natural, for the emotional element exerts much influence on the style. Śivadāsa giving an account of the love sick state of Madanaketu tells Candralekhā:

जननयनचकोरीचन्द्रिके! चन्द्रलेखे!
विसृज सुतनु मौनं मादृशो नापराधी ।
इति निपतति जल्पन् पादयोस्ते प्रमादा-
दधिभुवि लिखितायाश्चित्रसङ्कल्पितायाः ॥

(Page 17, Śloka 29)

How simple and at the same time elegant is the style in this stanza! Rāmapāṇivāda has displayed great descriptive capacity and lyrical acumen in the farce. The elegant style and the aesthetic sense displayed in the work will vouchsafe that this cannot be one of the earlier works of the poet.

*Comparison with the Bhagavadajjukīya*[5]. The *Madanaketucarita* resembles Bodhāyanakavi's *Bhagavadajjukīyaprahasana* in certain respects.

1. Vasantasenā, a young courtesan, who is the heroine of the *Bhagavadajjukīya* dies due to snake-bite. In our *prahasana* Anaṅgalekhā too dies bitten by a serpent.

2. Parivrājaka, in order to display his yogic powers enters the dead body of Vasantasenā, while Śivadāsa in Madanaketucarita enters the dead body of Anaṅgalekhā.

3. For the sake of comic relief, in each farce a female character is seen begotten from within by a yogin.

4. The characters that speak Prākṛt occasionally resort to Sanskrit in both the works. Vasantasena and her maid sing Sanskrit stanzas in praise of Kāma[6]. Candanikā, a maid servant, takes te Sanskrit in the *Madanaketucrita*[7]. Anaṅgalekhā, when possessed dy Śivadāsa's soul speaks Prākṛt, but turns to Sanskrit at times[8].

There is also considerable difference between these two farces with regard to their technique. The *Bhagavadajjukiya* resembles the Trivandrum Plays ascribed to Bhāsa in points of technique, such as:

(1) Absense of *Nāndī*.

(2) Omission of the name of the author and of the play in the *Sthāpanā*.

(3) Introduction of death scenes on the stage.

5. Edited by P. Anujan Acchan, 1925.
6. *Vide Bhagavadajjukīya*, pp. 59—60
7. *Vide*, p. 25.
8. *Vide* p. 45.

In all these respects the *Madanaketucarita* remains rue to the accepted rules regarding dramatic technique. In this work there is *Nāndī*, the work and the author are mentioned in the prologue, and death scenes are not represented on the stage.

*Conclusion.* Rāmapāṇivāda in his excessive modesty has underrated his own eminence as an author. Regarding his position among other great authors, it is figuratively said :

दीप्तिं विन्दति किं न चन्द्रमहसामग्रेऽपि तारागणः ।

(Page 2, Śloka 4)

Further at the end of the work the poet expresses lack of confidence in the success of his own attempt:

प्रहसनलक्षणलेशैः स्पृष्टं चेत् प्रहसनाभिधां लभताम् ।
नो चेत् पुनरन्यदिदं विनोदनं पाणिवादस्य ॥

(Page 56)

This work satisfies all the outstanding dramatic rules laid down with regard to a *prahasana.* The plot is the poet's own invention. Among the characters a Bhikṣu and a Kapālika and courtesans and other low people are to be seen. The predominating sentiment is comedy. So the diffidence expressed by the poet is only a product of his modesty and it is certain that scholars will reckon this work as a valuable contribution to the *prahasana* branch of dramatic literature in Sanskrit.

P. K. NARAYANA PILLAI.

UNIVERSITY LIBRARY
6 - NOV 1953
MADRAS

॥ श्रीः ॥

रामपाणिवादविरचितं

# मदनकेतुचरितं प्रहसनम् ।

नाहं ते कुचकुम्भयोर्विरचये कस्तूरिकापत्रकं
किं यत्नेन यदाशु भस्मरजसा भूयोऽपि सन्दूष्यते ।
एवंवादिनि शैलराजदुहितुस्सासूयमालीजने
सव्रीळं शशिशेखरे निपतितो नेत्राङ्कुरः पातु वः ॥ १ ॥

(नान्द्यन्ते[1] ततः प्रविशति सूत्रधारः ।)

**सूत्रधारः —**

योगिनि वा भोगिनि वा
रोगिणि[2] वा वित्तदे विरागिणि वा ।
साधारणप्रवृत्ति-
र्विदग्धगणिकाजनो जयति ॥ २ ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य)[3]

कोऽत्र भोः ।

(प्रविश्य)

**पारिपार्श्विकः[4] —** आज्ञापयतु भावः ।

---

१. 'नान्द्यन्ते सूत्रधारः' ख.
२. 'रागिणि' ख.
३. 'नै' ख.
४. 'पार्श्वकः' ख.

सूत्रधारः — मारिष! अपि शृणोषि मङ्गलग्रामवास्तव्येन रामपाणिवादेन विरचितं मदनकेतुचरितं नाम प्रहसनमस्मद्वशे वर्तत इति।

पारिपार्श्विकः — भाव! अथ किम्।

सूत्रधारः — तदद्य रङ्गनाथस्य भगवतो यात्राप्रसङ्गेन सङ्गतायामस्यां परिषदि प्रयुञ्जाना विज्ञानप्रपञ्चस्य साफल्यपदवीमारोढुमभिलषामः। कुतः —

मुक्ताजालैर्ललितघटितः प्रोल्लसन्नायकश्री-
स्तन्वङ्गीनां विलसतितरामङ्ग एवाङ्गहारः।
अस्माकं तु प्रकृतिगहनैर्मुष्टिमुद्रापताका-
मुख्यैरङ्गैरुपचितवपू रङ्ग एवाङ्गहारः॥ ३॥

पारिपार्श्विकः — तत्किमनेन जनेन करणीयम्।

सूत्रधारः — मारिष! किमन्यत्करणीयम्। यथास्वं सङ्गीतकप्रपञ्चेषु परिचयः कर्तव्यः।

पारिपार्श्विकः — स पुनर्यथानैपुणं क्रियत एव। किन्तु आधुनिकानां निबन्धनान्यवधून्वन्ति सन्त इति केवलमुदास्यते।

सूत्रधारः — (विहस्य) मारिष! मा मैवम्।

पश्य —

ये गृह्णन्ति गुणानणूनपि कवेः काव्येषु नव्येष्वपि
प्रायो नो गणयन्ति दोषनिवहं ते नाम सन्तः किल।
बालोऽप्यात्मकृतिप्रकाशनविधौ शक्नोति तेषां पुरो
दीप्तिं विन्दति किं न चन्द्रमहसामग्रेऽपि तारागणः॥ ४॥

तेन हि यद्वा तद्वा भवतु, प्रस्तूयतां प्रस्तुतवस्तु।

---

१. 'पारिपार्श्वकः—अथ किम्' ख.

२. 'प्रयोजनावधौ' ख.

किञ्च —

परिषदमाराधयितुं[1]
प्रयतेथाः सर्वथा[2] दुराराधाम् ।
गणिकामनङ्गलेखां
भिक्षुरसौ विष्णुमित्र इव ॥ ५ ॥

(इति निष्क्रान्तौ[3] ।)

इति प्रस्तावना ।

---

(ततः प्रविशति भिक्षुः ।)

भिक्षुः — (सनिश्वासम्)

निद्रे ! देवि ! मृगीदृशः कुचतटात्संव्यानचीनांशुकं
व्याकृष्टुं तनुमुन्नतस्तनभरानम्रां समालिङ्गितुम् ।
तद्बिम्बाधरमाननं करतलेनोन्नाम्य सञ्चुम्बितुं
प्रत्यूहस्तव वैमुखी मम परं मात्सर्यमुत्सृज्यताम् ॥ ६ ॥

(सविमर्शमात्मानं निर्दिश्य) अहो नु खलु विषमो मम संसार-[4]
मार्गः । कुतः —

वसानः काषायं वसनमपिधानं रतिपते-
र्दधानस्तां चित्ते चकितहरिणीशावनयनाम् ।
वहन् पाणौ दण्डं विषयशफरीजालबळिशं
परीरम्भाशंसी कथमपि नयाम्येष दिवसान् ॥ ७ ॥

---

१. 'मनुकूलयितुं' क.

२. 'सर्वदा' ख.

३. 'निष्क्रान्तौ । प्रस्तावना' ख.

४. 'संसारः' क.

सा खल्वनङ्गलेखा —

आवृत्तिशून्यां पदवीं प्रपित्सो-
निर्वर्तितं मे विषयोपरागात् ।
इदं मनः कष्टमपाङ्गपाशै-
राकृष्य दत्ते शफरध्वजाय ॥ ८ ॥

(पुरोऽवलोक्य) अये ! सिंहलेश्वरस्य मदनकेतोर्देव्याः शृङ्गार-मञ्जर्याश्चेटी जयन्तिका इत एवागच्छति ।

(प्रविश्य)

चेटी — (क) जेदु भअवन्तो ।

भिक्षुः — भद्रे जयन्तिके ! कुतस्तावदागम्यते ? ।

चेटी — (ख) भट्टिणीपादाणं परिसरादो ।

भिक्षुः — अथ केदानीं तत्रभवती शृङ्गारमञ्जरी ? ।

चेटी — (ग) अन्तेउरबाहिरुय्याणमणिसिळापट्टए वट्टन्तिए भट्टिणीए भअवन्तं अण्णेसिउं पेसिदह्मि ।

भिक्षुः — अथ किं प्रयोजनमस्माभिस्तत्रभवत्याः ।

चेटी — (घ) जोईसरेहि तुह्मेहि कस्स ण पओअणं होइ ।

भिक्षुः — भद्रे ! कथय परमार्थम् ।

चेटी — (ङ) परमत्थं ण आणामि । सयं एव्व गदुअ जाणादु भअवन्तो ।

---

(क) जयतु भगवान् ।

(ख) भट्टिनीपादानां परिसरात् ।

(ग) अन्तःपुरबाह्योद्यानमणिशिलापट्टके वर्तमानया भट्टिन्या भगवन्तमन्वेष्टुं प्रेषितास्मि ।

(घ) योगीश्वरैर्युष्माभिः कस्य न प्रयोजनं भवति ।

(ङ) परमार्थं न जानामि । स्वयमेव गत्वा जानातु भगवान् ।

भिक्षुः — (स्वगतम्) अपि कदाचिन्ममायमभिषङ्गो देव्या विदितविस्तारः स्यात् । (विचिन्त्य) कष्टं भोः कष्टम् ।

वीथ्यामस्यां सलीलार्पितपदकमलं सञ्चरन्तीं हसन्तीं
वेल्लच्चिल्लीलताञ्चितवलितकटाक्षाञ्चलान्युत्किरन्तीम् ।
यूनो वक्रोक्तिचित्रप्रहसनसरसैर्भाषितैस्तोषयन्तीं
ध्यायंध्यायं प्रियां तां पदमपि चलितुं नोत्सहे किं करोमि ॥

(प्रकाशम्) भद्रे ! सावशेष इव मे प्राभातिको विधिः । तदवसाने पुनरविलम्बितमागमिष्यामि ।

चेटी — (क) जइ एव्वं ता बाहिरुय्याणे देवीं ण पेक्खिस्ससि ।

भिक्षुः — कथमिव ? ।

चेटी — (ख) अज्ज हु देवी महाराएण सह अत्थणिआमण्डवं गन्तुं आडत्त त्ति सुणीअदि ।

भिक्षुः — अथ केदानीमसौ द्रष्टव्या ?

चेटी — (ग) सव्वहा बाहिरुय्याणं एव्व आअच्छदु भअवन्तो । पच्छा सव्वं णादव्वम् ।

भिक्षुः — एवमस्तु । तद्गच्छतु भवती ।

चेटी — (घ) जं भअवन्तो आणवेदि । (इति निष्क्रान्ता ।)

---

(क) यद्येवं तद्बाह्योद्याने देवीं न प्रेक्षिष्यसे ।

(ख) अद्य तु देवी महाराजेन सह आस्थानिकामण्डपं गन्तुं आरब्धेति श्रूयते ।

(ग) सर्वथा बाह्योद्यानमेव आगच्छतु भगवान् । पश्चात् सर्वं ज्ञातव्यम् ।

(घ) यद् भगवान् आज्ञापयति ।

---

१. 'कटाक्षाङ्कुरान्' ख.

२. 'तदवसितौ' ख.

३. 'चेटी — तह । निष्क्रान्ता' ख.

भिक्षुः — (समन्तादवलोक्य) अहो प्रभातसमयस्य [1]रमणीयता । सम्प्रति हि —

नीरन्ध्रध्वान्तदन्तावलहरिनखरश्रेणयः पद्मवाटी-
सम्भ्रान्तस्सुप्तपत्त्रभ्रमरकु[2]लवधूसाधुबोधप्रदीपाः ।
पूर्वाशावेशनारीमुखलिखितपरिस्पष्टसिन्दूररेखाः
कोकीशोकार्णवौर्वानलविपुलशिखा भान्ति भानोर्मयूखाः ॥

(नेपथ्ये)

लिप्यन्तां मणिकुट्टिमास्सुरभिलैः कस्तूरिकाकर्दमै-
रुच्चालीकृतकेतुजालमखिलं चीनांशुकैर्बध्यताम् ।
पुष्पाणां च रजोभरैश्शबलतां व्योमाङ्गणं नीयता-
मास्थानं प्रति सम्प्रति प्रचलितो देवो हि देवीसखः ॥ ११ ॥

भिक्षुः — (अग्रतोऽवलोक्य) अये! अयं मदनकेतुरास्थानिकामभ्यागच्छति ।

(विचिन्त्य)

ममायमर्थः प्रायेण राजगोचरमेष्यति ।
नदीनामम्भसामोघः सिन्धुं नाप्राप्य तिष्ठति ॥ १२ ॥

(इति निष्क्रान्तः ।)

विष्कम्भकः ।

---

१. 'रमणीयता । नीरन्ध्र' ख.

२. 'वरवधू' ख.

(ततः प्रविशति राजा देवी विभवतश्च परिवारः ।)

(सर्वे आसनोपवेशं रूपयन्ति ।)

राजा — प्रिये ! शृङ्गारमञ्जरि !

राजानो मौलिमालाघटितकरपुटास्सम्भृतोपायनार्था-
स्सार्थीभूय प्रपन्नाः प्रतिदिनमिह नः पादपीठे लुठन्ति ।
त्वं च त्रैलोक्यरत्नं हृदयरतिपदे वर्तसे जागरूका
मन्ये पूर्वेऽपि सर्वे मम नयविभवैर्निह्नुता भूमिपालाः ॥१३॥

देवी —(क) महाराअ अह इम् । पुव्वेसु केण उण कलिंगरज्जं णिज्जिअम्, जहिं खु महाराएण जुवराओ मअणवम्मा णिक्खित्तो ।

राजा — मदनवर्मेत्युक्तवत्या भवत्या स्मारितम् । अथ मदनवर्मणा प्रेषितो दूतः क्वेदानीम् ।

(प्रविश्य)

दूतः — जयतु महाराजः ।

राजा — भद्र जम्भक ! अपि कुशली कुमारः ?

दूतः — महाराज ! अथ किम् । (इति पत्रिकां ददाति ।)

राजा —(गृहीत्वा वाचयति ।) "स्वस्ति, कलिङ्गराज्यनिवासी मदनवर्मा निजकरतलतरलकरवालधारानिकृत्तशत्रुभटविकटकण्ठनालगलितबहलरुधिरधोरणीशोणीकृतधरणीमण्डलस्य समनुष्ठितसकलकार्यस्यार्यस्य पादौ मनसा प्रणम्य विज्ञापयति — श्रेय एव समस्तम् । अत्रत्याः प्रकृतयोऽप्यनुरक्ता आर्यस्य प्रसादेन ।

अपि च —

प्रेङ्खत्काञ्चनशृङ्खलाखणखणध्वानेन लोकत्रयी-
कर्णारुन्तुदकर्कशेन कणशो विन्ध्याद्रिसंधिच्छिदः ।

---

(क) महाराज ! अथ किम् । पूर्वेषु केन पुनः कलिङ्गराज्यं निर्जितम्, यत्र खलु महाराजेन युवराजो मदनवर्मा निक्षिप्तः ।

---

१. 'सिद्धि' क.

अथोपायनदन्तिनः कटतटश्च्योतन्मदाम्भोझरै-
रावासं परितश्चिराय परिखाचक्रं परिष्कुर्वते ॥ १४ ॥

किं बहुना लिखितेन । इदं तदपरं विज्ञाप्यते । अत्र कोऽपि कापालिकव्रतधारी निखिलयोगविद्यापारीणशिवदासो नाम पाषण्डचूडामणिर्लाटविषयादभ्यागतः । तेन च बहून्यद्भुतान्यत्र प्रदर्शितानि । तदेवंविधोऽयमस्मद्विस्रम्भभाजनमार्यपादैरपि सम्भावनीय इति मया जम्भकेन सहायसकाशमनुप्रेषितः । अतः परमार्यपादाः प्रमाणम् । लिखितावशिष्टं पुनर्जम्भकमुखादवगन्तव्यम्" इति । भद्र जम्भक! क्वासौ तत्र भवान् शिवदासः।

दूतः — एष प्रवेशयामि ।

(निष्क्रान्तः ।)

राजा — (स्वगतम्)

द्रमिडविषये यन्मे लोकत्रयीनयनामृतं
किमपि गणिकारत्नं कर्णाध्वना हृदयं गतम् ।
तदिह शिवदासोऽयं सर्वाद्भुतैकधुरन्धरो
मम परिसरं प्रत्यानेतुं प्रसीदति वा न वा ॥ १५ ॥

(ततः प्रविशति दूतोपदिश्यमानमार्गः शिवदासः ।)

शिवदासः — (सानन्दं परिक्रामन्)

सद्यः कृत्तनृमुण्डकुण्डलधरश्शुष्कास्थिमालावलीं
बिभ्राणो धवलश्मशानभसितप्रोद्भासिना वक्षसा ।
पूर्णं ब्रह्मशिरःकपालचषकं पाणौ सुराया दधत्
स्वच्छन्दं विहरन्नसौ विजयते देवो महाभैरवः ॥ १६ ॥

---

१. 'निखिलविद्या' क.
२. 'क्वासौ शिवदासः' ख.
३. 'प्रवेश्यते' ख.
४. 'आनन्दमन्दं परि' ख.
५. 'लिं' ख.

दूतः — (सप्रश्रयम्) इत इतो भवन्तः।

शिवदासः — (सबहुमानं स्वगतम्) साधु मदनवर्मन्! साधु, यदभिहितोऽस्मि भवता— "सखे! शिवदास!

राज्ये सिंहलभूभुजां नयनिधेरार्यस्य बाहूष्मभि-
स्संगुप्तेऽपि पदं चिकीर्षति किल स्थेयानधर्माङ्कुरः।
यस्मिन् कामपि बन्धकीमभिलषन्नन्त्याश्रमस्थोऽपि सन्
कश्चिन्माद्यति भूसुरः प्रबलयत्यार्यश्च तत्साहसम्॥ १७॥

तदेवं सिकताकूपवद्विशीर्येत नो जनपदः। तद् भवानद्भुत-प्रकाशनव्यपदेशेन तस्य योगिनः स्वयमैहिकेषु विरक्तिमुत्पाद्य नः सन्त्रातुमर्हति" इति। (प्रकाशम्) भद्र जम्भक! तत्रभवतो मदन-वर्मणो ज्यायःनयं महाराजो मदनकेतुरिति त्वरते मनस्तदवलोकनमहोत्सवाय। तत् क्वेदानीमत्रभवान्।

दूतः — (अग्रतो निर्दिशन्) एष खलु महाराजो देव्या सह महास्थानमण्डपिकामध्यास्ते। तदुपसर्पन्तु भवन्तः।

शिवदासः — बाढम्। (उपसृत्य) विजयतां महाराजः।

परमं दैवतं यो मे भैरवस्ते प्रसीदतु।
भुवनान्तर्गतं वस्तु यत्प्रसादात् प्रकाशते॥ १८॥

राजा — (आसनाद् किञ्चिदुत्थाय) भद्र! अभिवादये। एत-दासनमलङ्क्रियताम्।

शिवदासः — (उपविश्य) सुगृहीतनामन्! कच्चिदनामय-मस्य विश्वाद्भुतपदार्थसार्थनिधानस्य शरीरस्य।

---

१. 'दूतः इत' क.
२. 'भवानस्य योगिनः' ख.
३. 'विरागमुत्पाद्य' ख.
४. 'नमास्यताम्' क.

राजा — सार्वपथीनवैदग्ध्येषु भवादृशेषु विश्वमनुगृह्णानेषु कस्यामयस्य प्रसङ्गः। अथ केन पुनर्विनोदनप्रकारेणात्रभवद्भिरमी अनेहसो नीयन्ते।

शिवदासः — श्रूयताम्।

श्रीमद्भैरवपादपङ्कजरजस्सम्पर्कतः पावनं
मन्त्राकृष्टविशिष्टवारवनितापीतावशिष्टं मधु।
स्वाच्छन्द्येन पिबन् दुरापरमणीसक्तात्मना कामिना-
भिष्टं सङ्घटयन्नयामि दिवसानेतान्निमेषोपमान्॥ १९॥

राजा — अहो! साधीयांस्तव संसारधर्मः।

(प्रविश्य)

चेटी — (क) जेदु भट्टा। जेदु भट्टिणी। भट्टिणि! एस दाव भट्टिणीए हकारिदपुरुवो भिक्खुओ बाहिरुय्याणं उवट्ठिओ।

देवी — (ख) (सौत्सुक्यम्) किं उवट्ठिओ।

चेटी — (ग) कहं अण्णहा विण्णवीअदि।

देवी — (स्वगतम्) (घ) ता अनङ्गलेहाकामुएण णेण किंपि कीळिस्सम्।

शिवदासः — (स्वगतम्) को भिक्षुर्नाम।

देवी — (प्रकाशम्) (ङ) महाराअ! भिक्खुअं सम्भावेमि

(क) जयतु भर्ता। जयतु भट्टिनी। भट्टिनि! एष तावद् भट्टिन्याकारितपूर्वो भिक्षुको बाह्योद्यानमुपस्थितः।

(ख) किमुपस्थितः।

(ग) कथमन्यथा विज्ञाप्यते।

(घ) तदनङ्गलेखाकामुकेनानेन किमपि क्रीडिष्यामि।

(ङ) महाराज! भिक्षुकं सम्भावयामि।

१. 'सर्व' ख,
२. 'केन वि' क

राजा — (स्वगतम्) तर्हि वर्धतां परिहासतरुः । (प्रकाशम्) उचितमेतत् । सम्भावनीयः खलु तपस्वी ।

देवी — (उत्थाय) (क) हळा जअन्तिए इदो दाव ।

(इति चेट्या सह निष्क्रान्ता ।)

(राजा परितः पश्यति ।)

दूतः— महाराज ! प्रतिहारभूमौ किश्चिद्विश्रम्यते ।

राजा — अनुरूपमिदम् । (निष्क्रान्तो दूतः ।)

राजा — सखे शिवदास ! तदिह मत्कृतेऽपि किञ्चित्प्रयोजनमनुष्ठेयमत्रभवता ।

शिवदासः— आज्ञापयतु भवान् , आज्ञापयतु !

अस्मिन् ब्रह्माण्डखण्डे सुरवरतरुणी मानुषी वोरगी वा
यस्यामत्युत्सुकं ते परिपतति मनस्तामितो दर्शयामि ।
किञ्च प्रेमप्रबन्धप्रकटनपटुभिर्विभ्रमैर्मानसं ते
कर्षन्तीमाशु पीनस्तनभरनमितां वक्षसि प्रक्षिपामि ॥ २० ॥

अथवा अभिमतदेवीविलासविलोभिते त्वयि नेदं सम्भाव्यते ।

राजा — (सहर्षमुत्थाय) सखे ! कथयामि ते भूतार्थम् । द्रमिडमण्डले चन्द्रलेखेति प्रख्यातं किमपि गणिकारत्नमनुश्रूयते । तन्नामश्रवणात् प्रभृति मम हृदयमन्यादृशमिव वर्तते । तथाहि —

प्रत्यङ्गमङ्गनायास्तुङ्गकुचाभोगभुग्नमध्यायाः ।
विचरद्भिहरति सततं चिरहय्यानङ्गदूनं माम् ॥ २१ ॥

ईदृशी खलु दशा । किमतः परमावेदनीयम् । (इत्युपविशति ।)

---

(क) हला ! जयन्तिके ! इतस्तावत् ।

---

१. 'विषये' ख.

**शिवदासः** — यद्येवं तदलं विषादेन।

(प्रविश्य)

**प्रतीहारी** — जयतु महाराजः।

**राजा** — काञ्चिरयक! किमागमनप्रयोजनम्।

**प्रतीहारी** — देव! एषा कापि दुष्टकुट्टिनी कमपि योगिनं निर्दयमाकृष्य प्रतिहारभूमिं प्रापयति। श्रुत्वा देवः प्रमाणम्।

**शिवदासः** — शान्तं शान्तं पापम्। (सविमर्शं स्वगतम्) मन्ये मदनवर्मणा निर्दिष्टेनैव भिक्षुणा भवितव्यम्।

**राजा** — (स्वगतम्) कष्टमन्तरितोऽयमस्मन्मनोरथोपलम्भः परिहासरसेन। (प्रकाशम्) भद्र! कामं प्रविशतु।

**प्रतीहारी** — बाढम्।

(निष्क्रान्तः।)

(ततः प्रविशति कुट्टिन्याकृष्यमाणो भिक्षुः।)

**भिक्षुः** — मुञ्च हताशे! मुञ्च।

**कुट्टिनी** — (क) (सरोषम्) कहं णाम वञ्चअं तुमं मुञ्चिस्सम्, जेण तवस्सिणी मे दुहिआ बळामोडीए गह्णिअ कलुसीकिदा। किं मण्णेसि अराअरक्खिअं एदं रज्जं ति।

**भिक्षुः**— (स्वगतम्)

कुट्टिन्या दृढमुष्टिकुट्टिकशतैर्निष्पिष्टसन्धीन्यपि
प्रायो नातिरुजं भजन्ति विकसच्चित्तस्य गात्राणि मे।

(क) कथं नाम वञ्चकं त्वां मोक्ष्यामि, येन तपस्विनी मे दुहिता बलात्कारेण गृहीत्वा कलुषीकृता। किं मन्यसे अराजरक्षितमिदं राज्यमिति।

1. 'प्रतहरः' ख.

गाढं पीडितवान् हठादपि यतो वक्षोरुहौ वक्षसा
सोऽहं मुग्धदृशो विवृत्तमपि तद्वक्त्राब्जमाघ्रातवान् ॥ २२॥

(प्रकाशम्) क्व तावन्मां नयति भवती।

कुट्टिनी — (क) हदास! अणुइदकारी तुवं राअउलं वज्जिअ अण्णहिं कहिं णीअसि ?।

भिक्षुः — (विहस्य) किं मे राजकुलप्रापणेन हीयते[1] यतो देवीनियोगेनैव मयैवमनुष्ठितम्। आदिष्टोऽहं देव्या यथा — 'भगवन्नस्त्यत्र वेशवाटे काचिदनङ्गलेखा नाम गणिका। तन्नाम्नाहमतिक्रान्तायां निशि महाराजेनाहूतास्मि। तदिदानीं तद्गतहृदयस्य महाराजस्य मनोरथं पूरयितुमत्रभवता सेयमानेतव्या। सा पुनर्यदि प्रातिकूल्यमाचरेत्तर्हि बलादाकृष्टव्या' इति।

कुट्टिनी — (ख) अलिअं ण एदम्। कुदो मे तारिसो भाअहेओ जेण सिंहळाहिणाहेण वि मह दुहिआ पत्थीअदि। (पुरोऽवलोक्य) एसो चिट्ठइ महाराओ। ता कवडभिक्खुअ एहि। (इति भिक्षुमाकर्षन्ती राजानमुपसृत्य) जेदु वण्णस्समरक्खओ सिंहळाहिणाहो।

राजा — (उत्थाय) भगवन्! अभिवादये।

भिक्षुः — (सबाष्पम्) परिरक्षतु मां महाराजः।

कुट्टिनी — (ग) महाराअ! ण परिरक्खणीओ एसो अस्समदूसी हदासो।

---

(क) हताश! अनुचितकारी त्वं राजकुलं वर्जयित्वा अन्यत्र कुत्र नीयसे।

(ख) अलीकं नेदम्? कुतो मे तादृशो भागधेयः येन सिंहलाधिनाथेनापि मम दुहिता प्रार्थ्यते। एष तिष्ठति महाराजः। तत् कपटभिक्षुक! एहि। जयतु वर्णाश्रमरक्षकः सिंहलाधिनाथः।

(ग) महाराज! न परिरक्षणीय एष आश्रमदूषी हताशः।

---

१. 'हीयेत' ख,

शिवदासः — (स्वगतम्) साधुदर्शिनी खलु बुद्धिस्तत्र भवतो मदनवर्मणः येनैतत्सर्वं प्रथममेव पर्यालोचितम्। (प्रकाशम्) सर्वथा मुच्यतामयं भगवान्। पश्चात्सर्वमावेदनीयम्।

(कुट्टिनी भिक्षुं मुञ्चति। भिक्षू राज्ञा सहोपविशति।)

राजा — भगवन्! कथं किल भवतोऽप्येतद्व्यसनमापतितम्।

भिक्षुः — मद्व्यसनकारणमियमेव पापाशया प्रष्टव्या।

(राजा कुट्टिनीं वीक्षते।)

कुट्टिनी — (क) सुणादु महाराओ। अज्ज खु एदेण भिक्खुहदएण मह गिहं आअच्छन्तेण दुहिअं मे वराइं अणिच्छन्तिं एव्व हत्थे घेत्तूण विअणं पावअन्तेण सरहसं परिहाणदुऊलं पि आअड्ढन्तेण— अहवा अदो वरं किं णिवेदीअदि। किं उइदं एदं जोईसराणं। तदो णिट्ठुरं वि एव्वं मए अणुट्ठिअम्। अदो वरं महाराओ एव्व पमाणम्।

राजा — (सस्मितम्) भगवन्! अप्येवमिदम्।

(भिक्षुः सलज्जमधोमुखस्तिष्ठति।)

शिवदासः— भगवन्! किं लज्जसे। यथानुभूतमावेद्यताम्।

भिक्षुः — (राज्ञः कर्णे) एवमिव।

राजा — (विहस्य स्वगतम्) अहो परिहासरसचातुरी शृङ्गारमञ्जर्याः। भवत्वेवं तावत्। (प्रकाशम्) भद्रे! गच्छ स्वगृहमेव। अयं त्विह नियम्यते।

---

(क) शृणोतु महाराजः। अद्य खलु एतेन भिक्षुहतकेन मम गृहमागच्छता दुहितरं मे वराकीमनिच्छन्तीमेव हस्ते गृहीत्वा विजनं प्रापयता सरभसं परिधानदुकूलमप्याकर्षता — अथवा अतः परं किं निवेद्यते। किमुचितमेतद् योगीश्वराणाम्। ततो निष्ठुरमप्येवं मयानुष्ठितम्। अतः परं महाराज एव प्रमाणम्।

---

१. 'प्रथमेवालोचितम्' क.

कुङ्किनी - (क) जं महाराओ आणवेदि ।

(निष्क्रान्ता ।)

राजा — (जनान्तिकं भिक्षुं प्रति) भगवन् ! सुदृढमनुरक्तो भवाननङ्गलेखायामिति श्रुतमस्माभिः ।

भिक्षुः — (जनान्तिकम्) एवमेतत् । इदानीन्तु —

कामं तया खलु बलादवधीरितोऽहं
रागस्तु सुभ्रुवि तथाप्यतिजृम्भते मे ।
धिक्कुङ्किनीं यदियमेव हि तां निरुन्धे ।
दोषो नियन्तुरिह दुष्यति यत्करेणुः ॥ २३ ॥

राजा — (सचमत्कारमात्मगतम्)

प्रेयस्तु प्रकटितमप्रियप्ररोहं
छिन्दानो गमयति कुङ्किनीं मनोभूः ।
कोपं च प्रणयविशेषणं विधत्ते
गाणिक्यं जयति परार्पितात्मदोषम् ॥ २४ ॥

(प्रकाशम्) यद्येवं तदलं विषादेन यदस्य सर्वाद्भुतनिधेश्शिवदासस्य सकाशात्सर्वं सम्भाव्यत एव । (शिवदासं प्रति) सखे ! तदयमेवावसरः प्रकृतारम्भस्य ।

शिवदासः — तथावदिदानीम् —

अवतरतु धरित्रीमेव राकाशशाङ्कः
पिबतु बकचकोरश्चन्द्रिकामेतदीयाम् ।
अपि च विकचपुष्पा मल्लिका जङ्गमत्वं
व्रजतु भजतु चैनामुत्सुको भृङ्गराजः ॥ २५ ॥

(इति ध्याननिमीलितलोचनस्तिष्ठति ।)

---

(क) यन्महाराज आज्ञापयति ।

---

१. 'किन्तु' ब.

(नेपथ्ये)[1]

(क) को णाम मं अड्ढेइ ।

(राजभिक्षू विस्मयं[2] रूपयतः ।)

(ततः प्रविशतिचन्द्रलेखा ।)

चन्द्रलेखा —(ख) (समन्तादवलोक्य) कहिं दाणिं पदेसे वट्टामि । (राजानं दृष्ट्वा सविस्मयम्) अहो भुवणेक्कसुन्दरो को णाम एसो महाणुभावो जो दिट्ठमत्तो एव्व बहुपुरिससाहारणं पि मे हिअअं आअड्ढेइ । (शिवदासमवलोक्य) को उण एसो झाणं अणुचिट्ठइ । मण्णे णेण अहं एत्थ आणीदन्ति त्ति । (भिक्षुं दृष्ट्वा) णेण वि केण वि परिव्वाजएण होदव्वम् । (इति राजानमेव सस्पृहमवलोकयति ।)

राजा —(सहसावलोक्य सहर्षविस्मयम् ।)

अहो चित्रं चित्रं कुसुमशरकोदण्डशरणं
वहन्ती[4] तारुण्यं जननयनपीयूषकिरणम् ।
पिबन्ती सन्तोषं मम हृदि हरन्ती[5] च विनयं
क्षिपन्ती[6] वा धैर्यं जयति जगदेषा शशिमुखी ॥ २६ ॥

---

(क) को नाम मां कर्षति ? ।

(ख) कुत्रेदानीं प्रदेशे वर्से ? । अहो ! भुवनैकसुन्दरः को नामैष महानुभावः यो दृष्टमात्र एव बहुपुरुषसाधारणमपि मे हृदयमाकर्षति । कः पुनरेष ध्यानमनुतिष्ठति । मन्ये अनेनाहमत्र आनीतेति । अनेनापि केनापि परिव्राजकेन भवितव्यम् ।

---

१. 'नैपथ्ये' ख.

२. 'सविस्मयं' ख.

३. 'अड्ढियन्ति' ख.

४. 'लसन्ती' क.

५. 'किरन्ती बहुतरं' क

६. 'हरन्ती' क.

सखे शिवदास! मुधा खलु विफलयसि समाधिनिमीलनेन लोचनयुगलम् । पश्य पश्य --

सैवेयं भुवनैकसुन्दरितमा कन्दर्पदर्पद्रुमं
सिञ्चन्ती सुषमामृतेन वपुषश्चित्ताङ्गणे मादृशाम् ।
यामेवालिखदन्तरङ्गफलके सङ्कल्पशिल्पी यथा-
पूर्वं चन्दनचन्द्रमन्दपवना मर्माविधो निर्मिताः ॥ २७ ॥

चन्द्रलेखा — (स्वगतम्) (क) दिट्ठिआ मम वि किदे ईरिसं अवत्थन्तरं गदो महाणुभावो ।

शिवदासः — (अक्षिणी उन्मील्य, चन्द्रलेखां प्रति) सुन्दरि! इतस्तावत् । सम्भाव्यतामयमखिललोकप्रख्यातमहिमा राजसिंह-सिंहलाधिनाथो मदनकेतुः शृङ्गारमञ्जरीवल्लभः । अयं हि —

कर्णाकर्णिकया तवामरवधूदुर्वारगर्वापहा-
नुन्मत्तीकृतकामिनीगुणगणानुत्कर्णमाकर्णयन् ।
दीर्घं निश्वसिति क्षितौ विलुठति व्यस्तक्रमं जल्पति
स्वप्नानीतभवन्मुखाम्बुजमपि प्रेम्णा समाजिघ्रति ॥ २८ ॥

अपि च --

जननयनचकोरीचन्द्रिके! चन्द्रलेखे!
विसृज[2] सुतनु! मौनं मादृशो नापराधी ।
इति निपतति जल्पन् पादयोस्ते प्रमादा-
दधिभुवि लिखितायाश्चित्तसंकल्पितायाः[3] ॥ २९ ॥

---

(क) दिष्ट्या ममापि कृते ईदृशं अवस्थान्तरं गतो महानुभावः ।

---

१. 'गर्वोपनिर्वापकाङ्' ख.

२. 'सुतनु विसृज' ख.

३. 'याः स्वप्नसन्दर्शितायाः' ख.

चन्द्रलेखा -- (सप्रत्यभिज्ञं स्वगतम्) (क) एसो सो सिंहलाहि-णाहो मअणकेदू णाम। (सानन्दम्) मअणमोहणो एस महाणुभावो मम बन्धुविरहसम्भवं सन्दावं उम्मूलेअदि। (राजानमुपेत्य) जेदु सिङ्गार-मञ्जरीवल्लहो।

(प्रविश्य)

देवी -- (विलोक्य संशङ्कम्) (ख) का उण एसा महाराअस्स समीवे चिट्ठइ। होदु, एत्थ एव खम्भन्तरिदा जाणिस्सम्।

(तथा स्थिता।)

शिवदासः — भद्रे! महाराजस्य कृते मया त्वमाकृष्टासि मन्त्रबलेन।

देवी — (सरोषम्) (ग) सुट्ठु सोहइ कितवाणं समवाओ।

चन्द्रलेखा — (घ) अय्य! तुए मम सरीरमत्तं आअड्ढिअम्, महाराएण उण मणं पि आअड्ढेइ।

राजा — प्रिये! चन्द्रलेखे!

द्वन्द्वं सुन्दरि! पुण्डरीकमुकुलस्पर्धालु वक्षोजयो
गाढं वक्षसि निक्षिप द्रुततरं कन्दर्पदग्धस्य मे।
किञ्चोदञ्चय चञ्चलाक्षि! वदनं चुम्बामि बिम्बाधरं
बिब्बोकद्रविणेन केवलमहं क्रीतोऽस्मि दासोऽस्मि ते॥ ३०॥

---

(क) एष स सिंहलाधिनाथो मदनकेतुर्नाम। मदनमोहन एष महानुभावो मम बन्धुविरहसम्भवं सन्तापमुन्मूलयति। जयतु शृङ्गारमञ्जरी-वल्लभः।

(ख) का पुनरेषा महाराजस्य समीपे तिष्ठति। भवतु। अत्रैव स्तम्भा-न्तरिता ज्ञास्यामि।

(ग) सुष्ठु शोभते कितवानां समवायः।

(घ) आर्य! त्वया मम शरीरमात्रं आकृष्टं, महाराजेन पुनर्म-नोऽप्याकृष्यते।

---

१. 'साशङ्कं' ख.

२. 'दीसइ' ख.

देवी — (सेर्ष्यम्) (क) साहु महाराअ साहु ! एत्तिअं वेलं तुह हिअअं अआणन्तीए उज्जूआए मए कदत्थिदो तुवं ति अहो ! णिल्लज्जाम्हि ।

चन्द्रलेखा — (स्वगतम्) (ख) दिढं मइ णिवडइ से दिट्ठिराओ । ता एव्वं दाव । (प्रकाशम्) महाराअ ! अलं दाणीं एदेहिं दक्खिण्णवअणेहिं जेहिं देवीं खु अहिअरिअ तुइ अवराहो एव्व अवसिस्सइ ।

राजा — प्रिये ! मा मैवम् । कुतः —

देवीविरोधमनुशङ्क्य तवाङ्गसङ्ग-
सौख्यं चिराभिलषितं कथमुज्जहामि ।
व्यालीभयेन मलयाचलकन्दरस्थं
को वा पटीरतरुसारमपाकरोति ॥ २१ ॥

देवी — (सोष्णं निश्वस्य) (ग) तं सुदं जं भत्तुमुखादो सुणिदव्वं इत्थिआजणेण ।

शिवदासः — भद्रे ! युक्तमभिहितं सिंहलपरमेश्वरेण ।

केतकीकुसुमगर्भसम्भृतां
माधुरीजितसुधां मधूलिकाम् ।
कण्टकावलिपरिक्षतोऽपि सन्
नैव मुञ्चति कृती मधुव्रतः ॥ २२ ॥

देवी — (सरोषम्) (घ) केहिं वि कण्णेजपेहिं अदिसन्धिदो महाराओ ।

---

(क) साधु महाराज साधु । इयतीं वेलां तव हृदयमजानत्या ऋजुकया मया कदर्थितस्त्वमिति अहो निर्लज्जास्मि ।

(ख) दृढं मयि निपतत्यस्य दृष्टिरागः । तदेवं तावत् । महाराज ! अलमिदानीमेतैर्दाक्षिण्यवचनैर्यैर्देवीं खल्वधिकृत्य त्वयि अपराध एवावशिष्यते ।

(ग) तत् श्रुतं यद् भर्तृमुखात् श्रोतव्यं स्त्रीजनेन ।

(घ) कैरपि कर्णेजपैरतिसन्धितो महाराजः ।

(राजा चन्द्रलेखां हस्ते गृहीत्वा चिबुकमुन्नयति ।)

देवी — (सहसोपसृत्य) (क) महाराअ ! जुत्तं जुत्तम् ।

राजा — (सविलक्षं स्वगतम्) हन्त ! महति सङ्कटे पतितोऽस्मि । (इति चन्द्रलेखां मुञ्चति ।)

देवी — (ख) मा खु मा खु वालीभएण चन्दणरसं मुञ्चेहि । (शिवदासमवलोक्य) कण्डअभएण केदईमहूलिअं वा ।

राजा — (स्वगतम्) कथमिदमपि श्रुतमत्रभवत्या । तदपगतः प्रसादनोपायः ।

शिवदासः — (जनान्तिकम्) महाभागे शृङ्गारमञ्जरि[1] ! इतस्तावत् । कृतमिदानीं भर्तरि कालुष्येण । पश्य —

प्रेमा नाम प्रतिनवपदार्थान्तरे प्राणभाजां
निर्वेदं यज्जनयतितरां नित्यमुक्तः[2] पदार्थः ।
यद्वा तद्वा भवतु तदिदं रूढमूलस्तु राग-
स्त्वय्यैवास्ते कमितुरधुना सर्वमेतत्सहेथाः ॥ १३ ॥

देवी — (ग) एव्वं एदम् । किन्दु दक्खिण्णहआणं चिरंजुआणं वेलक्खमलिअधीराणं पुरदो ण ट्ठादव्वं मणस्सिणीहि ति णो धम्मो । ता अहं गमिस्सम् ।

शिवदासः — भद्रे ! इत्थमेव त्वया वैराग्यमुद्वहन्त्या न गन्तव्यम् । कुतः —

---

(क) महाराज ! युक्तं युक्तम् ।

(ख) मा खलु मा खलु व्यालीभयेन चन्दनरसं मुञ्च । कण्टकभयेन केतकीमधूलिकां वा ।

(ग) एवमेतत् । किन्तु दाक्षिण्यहतानां चिरं यूनां वैलक्ष्यमृदितधैर्याणां पुरतो न स्थातव्यं मनस्विनीभिरिति नो धर्मः । तदहं तावद् गमिष्यामि ।

---

१. 'रि कृत' ख.

२. 'मुक्तः' क.

दम्पत्योरितरेतरप्रणयिता लोकेन नो मृष्यते
गाढासूयतया स तद्विघटने जागर्ति च प्रायशः ।
भर्तारं विरहय्य कोपनतया मा याहि मायावता-
मस्मिन्नुत्सव एव केवलमहो हस्तावलम्बः क्रमः ॥ ३४ ॥

देवी —(विचिन्त्य) (क) आ उववण्णं खु एदम् । ता किं मए एत्थ कादव्वम् ।

शिवदासः — (कर्णे) एवमिव ।

(देवी तूष्णीं तिष्ठति।)

शिवदासः —(सस्मितम् )अयि मुग्धे! अलं विचिकित्सया । शिवदासः खल्वहमुपदेष्टा ।

देवी — (ख) का गई । एव्वं होदु । (प्रकाशं चन्द्रलेखां, प्रति) सहि चन्दलेहे ! एहि । आलिङ्गेहि मम् ।

(चन्द्रलेखा सलज्जमुपसृत्यालिङ्गति ।)

देवी — (ग) सहि ! दिट्ठमत्ता खु तुवं मह भइणीणिव्विसेसस्से सिणेहस्स भाअणं जाआसि । (राजानं प्रति) महाराअ! एसा मह सही जह बन्धुजणं ण सुमरेदि तह विहेहि । (इति चन्द्रलेखां राज्ञेऽर्पयति ।)

---

(क) आ ! उपपन्नं खल्विदम् । तत् किं मयात्र कर्तव्यम् ।

(ख) का गतिः । एवं भवतु । सखि चन्द्रलेखे ! एहि । आलिङ्ग माम् ।

(ग) सखि ! दृष्टमात्रा खलु त्वं मम भगिनीनिर्विशेषस्य स्नेहस्य भाजनं जातासि । महाराज ! एषा मम सखी यथा बन्धुजनं न स्मरति तथा विधेहि ।

---

१. 'एष' ख.

२. 'दासः अयि' क.

३. 'भहिणी' ख.

राजा —(सहर्षावहित्थम्) को देव्याः प्रसादं नानुमन्यते। (इति गृह्णाति।)

देवी — (क) ता अहं एदाए अलङ्कारणिमित्तं अन्तेउरं गच्छामि। (इति निष्क्रान्ता।)

राजा — साधु शिवदास! साधु। दुष्करनिष्क्रयास्तवोपकारप्रयोगाः।

भिक्षुः — (सबहुमानं स्वगतम्) अहो महानुभावः खलु शिवदासः। अनेन हि —

प्रत्यक्षदृष्टनिजवल्लभदुर्नयापि
देवी तथा नयविदा गमिता प्रसादम्।
नीरन्ध्रसन्तमससंव्रियमाणमूर्त्तिः
सन्ध्या यथा शरदि कैरववल्लभेन ॥ ३५ ॥

(नेपथ्ये)[३]

भद्रे चन्द्रलेखे! इतस्तावत् —

केलिस्नानविलुप्तपत्रलतयोर्वक्षोजयोरन्तरे
हारस्ते परिखेलतु स्मितसखैर्मुक्ताफलैर्गुम्फितः।
दिङ्मातङ्गशिरस्पदप्रतिभटे काञ्ची च काञ्चीपदे
कामाद्वैतवदावदेव लसतु प्रकाशमातन्वती ॥ ३६ ॥

शिवदासः -- महाराज! विसृज्यतामियम्।

राजा — प्रिये! शिवदासप्रणयमनुतिष्ठ।

---

(क) तदहमेतस्या अलङ्कारनिमित्तमन्तःपुरं गच्छामि।

---

१. 'प्रकाराः' ख.

२. 'मानमास्स' ख.

३. 'नैपथ्ये' ख.

४. 'लगतु' ख.

चन्द्रलेखा—(क) जं महाराओ आणवेदि ।

(इति राजानं सस्पृहमवलोकयन्ती निष्क्रान्ता)

भिक्षुः—सिंहळपते ! कियच्चिरमस्माभिरनवाप्तमनोरथैः स्थीयताम् ?

राजा—इदानीमयमेवारम्भः ।

शिवदासः—महाराज ! कोऽस्य भगवतो मनोरथः ।

राजा—एवमिव ।

शिवदासः—(करावृतमुखं विहस्य स्वगतम्) साधु मन्मथ ! साधु ।

कुलं वा शीलं वा विनयमथवा शौर्यमपि वा
प्रभुत्वं वा न त्वं गणयसि कदाचित्तनुभृताम् ।
स्वतन्त्रस्त्वं यस्मै नमयसि धनुः पुष्पघटितं
स तावद्दासत्वं चतुरयुवतीनां वितनुते ॥ ३७ ॥

साधूक्तं मदनवर्मणा । (विचिन्त्य) भवतु ।

चापल्यस्य परां काष्ठां मयायमनुभाव्यते ।
ततस्संसारभागेषु विरक्तिं प्रापयिष्यते ॥ ३८ ॥

(प्रकाशम्) भगवन् ! अपि सत्यमभिदधाति सिंहलराजः ?

भिक्षुः—(सलज्जम्) कथमयमप्यसत्यं ब्रवीतु नाम । अतः परं तु भवदायत्ता मम लोकयात्रा ।

शिवदासः—यद्येवं तदिदं गृहाण । (इति मदिराचषकं पूरयति ।)

भिक्षुः—महाभाग ! किमेतत् ।

शिवदासः—

प्रोदञ्चत्कलिकिञ्चितव्यतिकरे सिद्धौषधं योषितां
मुख्यं संवननं पुनर्भगवतः साक्षाद्भवानीपतेः ।
पीयूषेण समं पुरा विमथिताद् दुग्धाम्बुधेरुत्थितं
तत्तादृङ्मदिराभिधं मदपदं किञ्चित्पदार्थान्तरम् ॥ ३८ ॥

भिक्षुः—(सजुगुप्सम्) महाभाग ! परिव्राजकैः परिहरणीयमेतत् । तन्न गृह्णामि ।

---

(क) यन्महाराज आज्ञापयति ।

---

१. 'दासः— कोऽस्य' ख.

२. 'वितनुते । (विचिन्त्य)' ख.

शिवदासः— (विहस्य) कोऽन्य एवं परिव्राजकधर्माधिकारी।

अनङ्गलेखाधरशीधुपाने
समुत्सुकस्त्वं किल कामलोलः।
शिवार्चनेऽस्मिन् मदिरोपयोगे
साक्षात्परिव्राडिति युक्तमेतत् ॥ ३९ ॥

भिक्षुः—(सविलक्षम्) का गतिः।

(शिवदासः भिक्षवे चषकं ददाति। भिक्षुः गृहीत्वा पिबति।)

राजा—साधु शिवदास! साधु। कोऽत्र भोः!

(प्रविश्य)

काञ्चुकीयः—आज्ञापयतु महाराजः।

राजा—भद्र! एवमुद्घुष्यतां जनपदेषु—

ये नाम केचन तपोनिधयो वसन्ति
संसारधर्ममपहाय मदीयराज्ये।
ते सर्व एव मदिरामनिशं पिबन्तो
मच्छासनेन गणिकासदनं भजन्तु ॥ ४० ॥

शिवदासः— (स्वगतम्) इदं हि तत्साहसप्रबलीकरणं नाम।

(प्रकाशम्)

अहो! महाराज! तव प्रभावः
प्रजासुखोत्पादनतत्परोऽयम्।
पूर्वेषु को नाम समानवृत्ति-
रेवंविधं शासनमुच्चकार ॥ ४१ ॥

भिक्षुः—(ससम्भ्रमम्) महाभाग! किमेतत्।

आस्थानमेतदखिलं भ्रमतीव हा! मे
दृष्टिर्न च क्वचन सज्जति किं करोमि।

---

१. 'खलु' ख.

२. 'परं परि' ख.

३. 'सपनीय' ख.

४. 'कामिकतां व्रजन्तु' ख.

५. 'तु' ख.

६. 'भिक्षुः—महाभाग' ख.

शिवदासः—

धैर्यं[1] भजस्व भगवन्नधुना सुराया-
स्त्वत्पूर्वपानजनितस्तव सम्भ्रमोऽयम् ॥ ४२ ॥

(इत्युत्थाय भिक्षुमवलम्बते ।)

काञ्चुकीयः—(स्वगतम्) शान्तं शान्तं पापम् । कथं स्वामिनमप्यधर्मे प्रवर्तयत्ययं लाटदेशीयो हताशपाषण्डः । अथवा परिहासरसप्रकारोऽयं भविष्यति ।

(इति तूष्णीं निष्क्रान्तः ।)

(प्रविश्य)

चेटी—(क) जेदु महाराओ ।

राजा—चन्दनिके ! किमागमनप्रयोजनम् ?

चेटी—(ख) सुणादु महाराओ । (संस्कृतमाश्रित्य)

उत्कण्ठापरिपाण्डुकेरलवधूगण्डप्रभैर्निर्मितां
बिभ्राणा नववीटिकां करतले ताम्बूलवल्लीदलैः ।
कस्तूरीपरिमेलितस्तनभरा त्वन्मार्गदत्तेक्षणा
लीलावेश्मनि वर्तते कुतुकिनी सा चन्द्रलेखाधुना ॥ ४३ ॥

राजा—(सहर्षोत्सुकयम्) भद्रे ! अपि सत्यमिदम् ?

चेटी[3]—(ग) देव ! अणभिणादकेदवो दासअणो ।

शिवदासः—तत्किमुदास्ते महाराजः ।

यूथिका भजतु बालरसालं
कौमुदी श्रयतु शीतमयूखम् ।
त्वामसौ सरसकेलिधुरीणा
लोकनाथमधिगच्छतु तन्वी ॥ ४४ ॥

---

(क) जयतु महाराजः ।

(ख) श्रृणोतु महाराजः ।

(ग) देव ! अनभिज्ञातकैतवो दासजनः ।

---

१. 'स्थैर्यं' ख.

२. 'सुवदना' क.

३. 'चेटी — अण' ख.

(राजा उत्थाय शिवदासस्य कर्णे एवमिवेति[1] कथयित्वा चेट्या सह निष्क्रान्तः ।)

शिवदासः— जम्भकर्ण !

(प्रविश्य)

दूतः—आज्ञापयतु[2] महाभागः ।

शिवदासः— (कर्णे) एवमित्र ।

(दूतो निष्क्रान्तः ।)

भिक्षुः—महाभाग ! ननूक्तमेव भवदायत्ता मम[3] लोकयात्रेति तत्किमुदास्यते ?

शिवदासः— (स्वगतम्) अहो निर्बन्धः । (प्रकाशम्)भगवन् ! मा त्वरिष्ठाः । अयमेवात्र प्रस्तावः ।

(ततः प्रविशति दूतोपदिश्यमानमार्गानङ्गलेखा । )

अनङ्गलेखा—(क) भद्द जम्भअ ! अय्यसिवदासस्स सासणेण वि तह णाम साहसआरी भिरुद्धवेसो भिक्खुओ कहं सम्भावइज्जइ ।

दूतः—भद्रे ! अयमेवं[4] गणिकाधर्मः । पश्य—

भवत्वक्ष्णा काणो भवतु च जराशुष्कवदनः
पदा खञ्जो वास्तु व्रणनिचितगात्रो भवतु वा ।
जटी वा मुण्डी वा भवतु खुरणा वा किमु गिरा
यतो वित्तापत्तिः स खलु गणिकानां प्रियतमः ।। ४५।।

अनङ्गलेखा—(सस्मितम्) (ख) एवं एदम् । किन्दु अस्समदूसणं ण इत्थिआधम्मो । अहव तत्तहोदो सिवदासादो एव्व सव्वं जाणिस्सम् । ता कहिं णु खु तत्तभवन्तो ।

(क) भद्र जम्भक ! आर्यशिवदासस्य शासनेनापि तथा नाम साहसकारी विरुद्धवेषो भिक्षुकः कथं सम्भाव्यते ।

(ख) एवमेतत् । किन्तु आश्रमदूषणं न स्त्रीधर्मः । अथवा तत्रभवतः शिवदासादेव सर्वं ज्ञास्यामि । तत् कुत्र नु खलु तत्रभवान् ।

१. 'एवमिवेत्युक्त्वा' ख.

२. 'आदिशतु' ख.

३. 'मे' ख.

४. 'मेव हि त्वादृशीनां धर्मः । कुतः — भवत्वक्ष्णा' ख.

दूतः—(अग्रतो निर्दिश्य ) एष तिष्ठति स महात्मा । तदुपसर्पतु भवती ।

अनङ्गलेखा—(उपसृत्य) (क) जेदु महाभाओ ।

शिवदासः—भद्रे अनङ्गलेखे ! अमुं भगवन्तं प्रणम्योपविश ।

(अनङ्गलेखा तथा करोति ।)

भिक्षुः—(सहर्षं स्वगतम् ) अहो ! मम सुचरितपरिपाकः । कुतः —

जीवातुर्मे मदनविशिखव्रातविश्लिष्टसन्धे-
र्विश्लेषाग्निग्लपितमनसस्त्यक्तकृत्यान्तरस्य ।
यस्मादेषा नयनविषयं गाहतेऽनङ्गलेखा
मन्ये सोऽयं जयति शिवदासस्य मत्पक्षपातः ॥ ४६ ॥

शिवदासः—सुन्दरि ! अपि कुशलमस्य योगिनामपि मनोविकारजनकस्य शरीरस्य । (भिक्षुर्लज्जते । )

अनङ्गलेखा—(ख) महाभाअ ! अज्ज विसेसेण तुह्माणं सम्भावणाए ।

शिवदासः—भद्रे ! किमप्यारब्धमातुमभिलषामि ।

अनङ्गलेखा—(ग) अणुग्गहिदह्मि ।

शिवदासः—(जनान्तिकम् ) अयं खलु भगवान् विष्णुमित्रस्त्वया वचसामगोचरां दशामारोपितः । तथाहि—

अक्षस्रजा गणयतीव गुणांस्त्वदीयान्
दण्डं च पञ्चशरशासनवद्दधाति ।
काषायमावहति रागमिवैष मूर्तं
धूर्ते ! किमेनमनु ते वलते न चेतः ॥ ४७ ॥

---

(क) जयतु महाभागः ।

(ख) महाभाग ! अद्य विशेषेण युष्माकं सम्भावनया ।

(ग) अनुगृहीतास्मि ।

---

१. 'परी' ख.

२. 'अप्येनामवसस्य' ख.

अनङ्गलेखा—(क) महाभाअ! एदस्स अस्समदूषणे अकुसलह्मि।

शिवदासः—मुग्धे! दूरे तावदाश्रमदूषणं नाम। इदानीन्तु चटुलकटाक्षविक्षेपैरेनमानन्दय।

अनङ्गलेखा—(सस्मितम्) (ख) एव्वं होदु।

(इति भिक्षुं तिर्यक् पश्यति।)

भिक्षुः—(स्वगतम्)

मुहुर्वलितकन्धरं चटुलचारुचिल्लीलतं
पतन्ति मयि दृष्टयश्चलदृशो यथा सस्पृहम्।
तथाहमिह तर्कयाम्यखिललोकशोकच्छिदो
विधेर्मयि विजृम्भते प्रतिकलं कृपानुग्रहः॥ ४८॥

अनङ्गलेखा—(ग) भअवं परिव्वाजअ! अलं दाणिं अज्जोग्गे अहिणिवेसेण।

भिक्षुः—(उपेत्य) प्रिये! माभैवम्—

नालं मे मनसिशयस्य पञ्चबाणीं
प्रव्रज्या चकितमृगाक्षि! सन्निरोद्धुं।
आदीप्तां ज्वलनशिखां तिरश्चिकीर्षोः
कस्यासौ सिचयदशैति साधनत्वम्॥ ४९॥

शिवदासः—(जनान्तिकम्) अनङ्गलेखे! इमं किमपि कोपय तावत्। यतः सुप्तमत्तकुपितानां भावज्ञानं सुकरमाहुः।

अनङ्गलेखा—(घ) तह। (प्रकाशम्) भअवं! मा एव्वं भण।

मअणविलासविरुद्धं चिरआलुप्पण्णपुण्णपरिपाअम्।
एदं अस्समसारं मा मह फंसेण दूसेहि॥ ५०॥

भिक्षुः—(सकृपणम्)

---

(क) महाभाग! एतस्य आश्रमदूषणेऽकुशलास्मि।

(ख) एवं भवतु।

(ग) भगवन् परिव्राजक! अलमिदानीं अयोग्येऽभिनिवेशेन।

(घ) तथा। भगवन्! मैवं भण।

मदनविलासविरुद्धं चिरकालोत्पन्नपुण्यपरिपाकम्।
एतमाश्रमसारं मा मम स्पर्शेन दूषय॥

तन्मे ब्रह्म परं तदेव च पुनर्भिक्षुत्वलब्धेः फलं
सोऽयं जन्मसहस्रसञ्चिततपस्संभारपाकोदयः ।
पादौ बालतरुप्रवालमृदुलावुत्सङ्गमारोपय-
न्मन्दं मन्दमिमौ करेण यदहं संवाहयेयं तव ॥ ५१ ॥

(इति पादयोः पतति ।)

अनङ्गलेखा—(सनिन्दं परावृत्य) (क) उट्ठेहि दुट्टवडुअ, उट्ठेहि । किं अज्ज वि दुरहिलासं न मुञ्चेसि ।

भिक्षुः—(सरोषमुत्थाय) आः पुंश्चलि ! किं किं प्रलपसि ।

अष्टाङ्गब्रह्मचर्यव्रतधृतमतयो योगिनस्त्वादृशीना-
मन्ये चाहारनिद्रानिधुवननिरताः प्राणिनस्तुल्यकक्ष्याः ।
धिग्धिङ्मामीदृशीं त्वामनुनयकठिनां यः प्रियाकर्तुकामः
सिंहीदंष्ट्राशलाकां सपदि करतलेनाजिहीर्षामि मोहात् ॥

भो शिवदास ! कृतं कृतमनया दुराचारया । अपि च—

कनकशिखरी विद्याधीशो महेन्द्रसुरद्रुमा-
वपि न गमिता निस्सारत्वं मनागपि विभ्रमैः ।
इति खलु गतेर्मान्द्ये चिन्ताभरात्परिनिष्ठिते
जघनगरिमा वारस्त्रीणां बिभर्त्ययशः परम् ॥ ५२ ॥

किञ्च—

निम्नं क्वाप्युन्नतं क्वाप्यतिकृशमपरत्रान्यतोऽत्यन्तपीनं
सावद्यं स्त्रीति योगी विधिरकृत यथाप्रासमङ्गं यदासाम् ।
मूढास्तत्राप नाभिस्तनमुदरनितम्बं च चारुत्वपक्षे
निक्षिप्तं मन्वते चेदिह घुणलिपिषु व्यस्त एवावमानः ॥

शिवदासः—प्रसीदतु प्रसीदतु भगवान्[2] । अथवा अनङ्गलेखे ! त्वमेव तावत् प्रसादयातिकोपनमेनम् । यतः—

पुरुषान् परुषानपि स्वभावा-
न्म्रदिमानं गमयन्ति नार्य एव ।

160552
36832
015:2L401
H8

(क) उत्तिष्ठ दुष्टवटुक ! उत्तिष्ठ ! किमद्यापि दुरभिलाषं न मुञ्चसि ।

१. 'मारोपितौ' ख.

२. 'वान् अनङ्ग' ख.

UNIVERSITY LIBRARY

ननु दीधितयस्तुषारभानोः
स्वयमेव द्रवयन्ति चन्द्रकान्तान् ॥ ५५ ॥

अनङ्गलेखा—(उपेत्य) (क) भअवं ! पसीद ।

अणुराअपरिक्खणोइदाइ
पढमं चाडुसदाइ दंसअन्ति ।
अह बाहुलआहि कण्ठणालं
परिगिह्णन्ति जुवाणमम्मकाओ ॥ ५६ ॥

भिक्षुः — (सहर्षम्)

हरिचन्दनशीतलैस्त्वमङ्गै-
र्मम तीव्रस्मरदाहमाहरन्ती ।
वितरातिघनामनङ्गलेखे !
शतकृत्वो गतशङ्कमङ्कपालीम् ॥ ५७ ॥

(नेपथ्यादर्धप्रविष्टः पुरुषः शिवदासं प्रति)

वारिराशिपरिखावलयाया
भूषणं किमपि यो वसुधायाः ।
वापिकातटपटीरकुटीरे
त्वत्प्रतीक्षणपरः स किलास्ते ॥ ५८ ॥

(निष्क्रान्तः ।)

शिवदासः — (उत्थाय) भद्रे अनङ्गलेखे ! स्वनिलयमेव तावत् प्रतिष्ठस्व पुनर्दर्शनाय ।

---

(क) भगवन् ! प्रसीद ।
अनुरागपरीक्षणोचितानि प्रथमं चाटुशतानि दर्शयन्ति ।
अथ बाहुलताभ्यां कण्ठनालं परिगृह्णन्ति यूनामस्मादृशः ।

---

१. 'इदाइं' ख.
२. 'गह्णन्ति' ख.

अनङ्गलेखा — (क) महाभाअ! तह । (इति निष्क्रान्ता ।)

भिक्षुः — (समनोभङ्गं स्वगतम्) अहो! निर्घृणता शिवदासस्य ।

अभिवारिधि यस्तरङ्गिणी-
मनुकूलां प्रथमं न्ययूयुजत् ।
अधुना तु स एव तामहो!
प्रतिकूलीकुरुते समीरणः ॥ ५९ ॥

(प्रकाशम्) महाभाग! कथमीदृशो मम भागधेयपरिणामः ।

शिवदासः — भो महायोगिन्! किमिदं यावज्जीवं चापलमेवाभिनिविशसे?

क्वासौ संसारसिन्धोस्सुतरणतरणिर्योगिनामाश्रमस्ते
क्वामूर्निर्वाणचन्द्रोदयबहुलनिशाः केवलं वेशनार्यः ।
कल्याणं कामयेथाः परिचिनु च सभामुज्ज्वलां सज्जनानां
तीर्थस्नायी दुराशाकलुषितमधुना मानसं वा पुनीहि ॥ ६० ॥

जम्भक! एहि तावत् । (इति निष्क्रान्तः ।)

भिक्षुः — हन्त! वञ्चितोऽस्मि पाषण्डचण्डालेन । किमिदानीं करिष्ये । (विचिन्त्य) कष्टं भोः कष्टम् ।

पूर्वं तावदनङ्गशासनबलात्तत्साहसिक्यं कृतं
भूयः सिंहलभूपतिस्सकृपणं मोहान्मयोपाश्रितः ।
पापात्मा शिवदास एष च पुनर्वातित्रपं सान्त्वितः
संसिद्धो न मनोरथोऽयमथवा को वेत्ति वृत्तिं विधेः ॥ ६१ ॥

---

(क) महाभाग! तथा ।

---

१. 'सा — तह' ख.
२. '(प्रकाशं) — कथ' ख.
३. 'प्रायशो' ख.
४. 'बलात्त' ख.
५. 'भूमिप' ख.
६. 'संविद्धो' ख.

(१नेपथ्ये)

भद्र शिवदास ! इत इतः ।

सरस्तीरारामे सरसिजमधूलीपरिमला-
नजस्रं वर्षद्भिश्शिशिरपवनैश्शीतलतले ।
वसन्नेतां वेलां २गमयति ललाटन्तपरविं
महाराजः श्रीमन्नुपसर तदेनं कुतुकिनम् ॥ ६२ ॥

भिक्षुः — (आकर्ण्योर्ध्वमवलोक्य) कथं मध्याह्नः । सम्प्रति हि गर्भगृहाभ्यन्तरेषु —

पाटीरपङ्कपरिदिग्धपयोधराभि-
र्घर्माम्बुलेशदरलुप्तविशेषकाभिः ।
आश्लेषचुम्बनपणेनदरोदरेण
क्रीडन्ति केऽपि सुभगास्सह ४कामिनीभिः ॥ ६३ ॥

(सनिःश्वासम्) सर्वथा मध्याह्नस्नानविधिर्न लङ्घनीयः ।

(निष्क्रान्तः ।)

(ततः प्रविशति परिसरोपविष्टेन शिवदासेन सह मणिशिलातलोपविष्टो राजा देवी शृङ्गारमञ्जरी चन्द्रलेखा चामरधारिणी जयन्तिका च ।)

राजा —

प्रेङ्खच्चामरशीतमारुतधुतस्वेदाम्बुवक्त्राम्बुजाः
श्रीखण्डद्रवदिग्धमुग्धवपुषः स्वेच्छानुकूलाङ्गनाः ।

---

१. 'नैपथ्ये' ख.
२. 'गमयसि' ख.
३. 'परेण' ख.
४. 'कामिनीभिः । ततः' ख.

ये केचिद् गमयन्ति तिग्मकिरणप्रौढावलेपामिमां
वेलां ते हि पिबन्ति हन्त ! सुभगाः संसारमाध्वीरसान्
[ ॥ ६४ ॥

शिवदासः — (स्वगतम् ) भोः कष्टम् । तत्तादृशमाश्रमं बिभ्राणोऽपि भगवान् विष्णुमित्रस्संसारसागरे परिभ्राम्यति । तदिदानीं यथास्य मनो दूषितं तथैवं वैराग्यमप्युत्पादयिष्यामि । कुतः —

स्त्रीमूलस्योपतापस्य स्त्रिय एव प्रतिक्रिया ।
वह्निश्च वह्निमूलस्येत्यामनन्ति मनीषिणः ॥ ६५ ॥

किन्त्वनङ्गलेखा न प्रभवत्यत्र कृत्ये । यतः —

अपि विशन्ति कृशानुशिखावली-
मपि लिहन्ति महासिलतामुखम् ।
अपि गरं निगिरन्ति न कामिषु
प्रकटयन्ति मनो वनिताजनाः ॥ ६६ ॥

तत् किं करिष्ये । (इति चिन्तां नाटयति ।)

राजा — प्रिये शृङ्गारमञ्जरि ! चन्द्रलेखे ! माननीयः खल्वयं महात्मा शिवदासः । अनेन हि —

भिन्नाकरप्रभवमन्यतुलाविहीनं
धन्योत्तरैरपि दुरापमहो ! महार्घम् ।
रत्नद्वयं तदिदमेकसुवर्णपिण्डे
यत्नं विना विनिहितं विहिताभिसन्धि ॥ ६७ ॥

---

१. 'न परे संसार' क.
२. 'रसान् । भिक्षुः–सर्वथा मध्याह्नस्नानविधिर्न लङ्घनीयः । (इति निष्क्रान्तः ) शिवदासः–' ख.
३. 'वास्य विरक्तिरुत्पादनीया' ख.
४. 'त्यस्मिन्' ख.
५. 'कुतः' क.

[1]उभे — (सलज्जास्मितम्) (क) महाराअ! किं ण सम्भावीअदि सव्वुण्णअग्गुणमहत्तरेसु।

शिवदासः — (सोल्लासं स्वगतम्) भवतु दृष्टम्। तदेवं तावत्। (इति ध्यानं नाटयति।)

([2]नेपथ्ये)

कष्टं कष्टं केलिकान्तारदेशे
कुर्वाणासौ स्वेन पुष्पावचायम्।
दिष्टादिष्टा दुष्टसर्पेण दष्टा
दिष्टान्तं च प्रापितानङ्गलेखा ॥ ६८ ॥

(सर्वे सम्भ्रमं रूपयन्ति।)

(प्रविश्य सम्भ्रान्तो भिक्षुः)

भिक्षुः — परित्रायतां परित्रायतां महाराजः।

राजापचारो नियतं [3]प्रजाना-
मकालमृत्युप्रतिपत्तिहेतुः।
अपोहितुं दुर्विषहं तदागः
प्रसीद दातुं मम जीवितं च ॥ ६९ ॥

देवी — (ख) अहो अच्चाहिदम्। तुवरदु तुवरदु महाराओ तवस्सिणीए [4]जीवियपरिरक्खणाए।

राजा — (ससम्भ्रमम्) सखे शिवदास! किमनुष्ठेयमस्माभिः?

---

(क) महाराज! किं न सम्भाव्यते सर्वोन्नतगुणमहत्तरेषु।

(ख) अहो अत्याहितम्। त्वरतां त्वरतां महाराजस्तपस्विन्याः जीवितपरिरक्षणाय।

---

१. 'उभे — महाराअ' ख.

२. 'नैपथ्ये' ख.

३. 'प्रजायाम' क.

४. 'जीवियं परित्तादुम्' ख.

शिवदासः — (निमित्तं सूचयन्) अप्रमत्तास्तिष्ठन्तु भवन्तः । (इति द्रुतपदं निष्क्रान्तः ।)

भिक्षुः — (उपविश्य) राजन् ! किं मन्यसे ?

असावसाधारणमन्त्रवैदुषी-
धुरन्धरो दीनदयाधनोऽपि वा ।
इदन्तु नस्साम्प्रतमप्यरुन्तुदं
मनोगतं शल्यमपाकरिष्यति ॥ ७० ॥

राजा — भगवन् ! को जानीते महतां चरितानि । तत् क्षणं प्रतिपालयामः ।

(ततः प्रविशत्यनङ्गलेखाशरीरमाविशञ्छिवदासः ।)

शिवदासः — (स्वगतम्) अहं तावन्मन्त्रबलेन प्रथममनङ्गलेखायाः प्राणानाकृष्य यदृच्छामृते कस्मिंश्चित्तिरश्चि विनियुञ्जानो मायादन्दशूकेन सन्दंशितमस्याश्शरीरं लताकुञ्जनिक्षिप्तनिजकलेबरः सन् परपुरप्रवेशविद्यया प्रविशन्नस्य विष्णुमित्रस्य भिक्षोर्मनश्चापल्यमपनेतुं व्यवसितोऽस्मि । एवं च —

अम्बरं विगतमेघकलङ्कं
निर्मलां शरदमभ्युपयातु ।
योगिनोऽस्य हृदयं त्रुटिताशा-
बन्धनं भजतु शान्तिमुदग्राम् ॥ ७१ ॥

परिपूर्णमनोरथश्च भवतु तत्रभवान्मदनवर्मा, यस्त्विदानीं निजराज्यविनाशमाशङ्कमानो दुःखमास्ते ।

(इत्युपसर्पति ।)

भिक्षुः — (सहसावलोक्य सहर्षविस्मयम्) राजन् ! सिंहलपते ! पश्य पश्य —

---

१, 'क'मातृकायां (लक्ष) ३२ तमात् पत्रादनन्तरं एकं पत्रं न दृश्यते । तस्मादत्र 'त्रुटिताशाबन्धनं' इत्यारभ्य उत्तरत्र 'आलिङ्गेहि मम्' इति देवीवचनपर्यन्तो भागः अस्यां मातृकायां लुप्तः ।

निर्वाणाप्यनिलेन दीपकलिका सद्यः स्वयं दीप्यते
राहोर्वक्त्रमुपेयुषी शशिकला भूयः समुन्मीलति ।
सम्प्लुष्टापि समुद्भिनत्ति सहसा दावाग्निना मालती
सर्पेणाहतजीवितापि सुदती सञ्जीविताभ्येत्यसौ ॥ ७२ ॥

राजा — आश्चर्यमाश्चर्यम् ।

शिवदासः—(क) जेदु महाराओ । (भिक्षुं तिर्यक् पश्यन्) जेदु—(इत्यर्धोक्ते गद्गदरुद्धाक्षरं विरमति ।)

भिक्षुः — (सप्रमोदं स्वगतम्)

भावावेशस्निग्धतारा मृगाक्ष्या
लज्जायोगात् किञ्चिदाकुञ्चिताश्च ।
चञ्चच्चिल्लीवल्लरीलोभनीया
मय्येवास्याः संवलन्ते कटाक्षाः ॥ ७३ ॥

राजा — भद्रे ! दुष्टसर्पदंष्ट्राकरादाकृष्टासि तत्रभवता शिवदासेनास्य भगवतो मम च प्राणैः सार्धमित्यति हि नाम प्रमोदामहे ।

शिवदासः — (ख) तुह्माणं पसादो एत्थ काळणम् ।

देवी — (ग) सहि अणङ्गलेहे ! एहि आलिङ्गेहि मम् ।

(शिवदास उपेत्य देवीमालिङ्गति ।)

चन्द्रलेखा — (घ) सहि ! मं वि सम्भावेहि ।

शिवदासः — (स्वगतम्) इदं पुनर्मह्यमपि रोचते । (इति चन्द्रलेखामालिङ्गन् स्वगतम्)

---

(क) जयतु महाराजः । जयतु — ।
(ख) युष्माकं प्रसादोऽत्र कारणम् ।
(ग) सखि अनङ्गलेखे ! एहि आलिङ्ग माम् ।
(घ) सखि ! मामपि सम्भावय ।

---

१. 'मालिङ्गति' क.

यद्यपि प्रियतमापरिरम्भो
गात्र एव विकृतिं विदधाति
अन्यगात्रमपि निर्विशतो मे
निर्वृतिर्भवति कापि तथापि ॥ ७४ ॥

(प्रकाशम्) (क) दिट्ठिआ एत्थ एव्व जम्मे तुह्मेहि आलिङ्गिदह्मि त्ति अहो असम्भाविदं एदम् ।

राजा — भद्रे ! क्वेदानीं शिवदासः ?

शिवदासः — (ख) को शिवदासो णाम ?

राजा — (विहस्य) अयि धूर्ते ! किं न जानासि, येन विषधरमुखात् परित्रातासि ।

शिवदासः — (ग) (स्मृतिं[1]नाटितकेन) । आः सुमरामि । अण्णगअहिअएण (इत्यर्धोक्ते सशङ्कम्) अण्णगअहिअआए मए विसुमरिदं[2] ।

राजा — अहो ! महती तव चित्तभ्रान्तिः यतो लिङ्गव्यत्यासमप्यापादयति । अथ किं नामान्यगतहृदयत्वम् ?

शिवदासः — (भिक्षुं[3] विलोक्य) (घ) अणुइदं असम्भावणीअं च कहं विण्णवेमि ?

राजा[4] — भद्रे ! नेदमनुचितं नाप्यसम्भावनीयम् । कुतः —

---

(क) दिष्ट्या अत्रैव जन्मनि युष्माभिरालिङ्गितास्मीत्यहो असम्भावितमेतत् ।

(ख) कः शिवदासो नाम ।

(ग) आ स्मरामि । अन्यगतहृदयेन अन्यगतहृदयया मया विस्मृतम् ।

(घ) अनुचितमसम्भावनीयं च कथं विज्ञापयामि ?

---

१. 'नाटितेन' क.

२. 'अम्' ख.

३. 'पश्यति' ख.

४. 'राजा — नेद' ख.

यूनि स्त्रीणां स्त्रीषु यूनश्च रागो
वीतोपाधिर्दृश्यते जीवलोके ।
भावाश्चामी केन वा लङ्घनीया-
श्चित्तोन्माथं सर्वदा कुर्वते ये ॥ ७५ ॥

तदाषेद्यतामस्वस्थताहेतुः ।

शिवदासः — (स्वगतम्) किमत्र निह्नवेन । (प्रकाशम्) (क) जदा खु एदेण भअवदा अणिच्छन्ती एव्व अहं उपऊढा मन्दभाआए उण मए विमुहदा एव्व ओलम्बिआ तदप्पहुदि गहिदपच्चाद्दावा विजिम्भिअमअणा आअल्लअं विरहस्स असहमाणा अम्मकाविरुद्धं पि अहिसरणलाहवं अगणिअ आअदह्मि ।

भिक्षुः — (सहर्षं स्वगतम्)

कर्णौ चिरेण शृणुतं वचनामृतानि
पूर्णेन्दुबिम्बवदनस्य वधूजनस्य ।
आ जन्मनः श्रितवतोरपि योगिनं मां
जातैव धन्यजनुषोश्चरितार्थता वाम् ॥ ७६ ॥

राजा — (भिक्षुं प्रति) भगवन् ! अपि श्रुतम् ?

भिक्षुः — किमुच्यतेऽत्र श्रुतमिति । मम हि —

गात्रे वेपथुमातनोति पुलकश्रेणीं विधत्ते मुहु-
र्घर्माम्भःकणिकाभिराभिरतुलं बध्नाति मुक्तासरम् ।

---

(क) यदा खलु एतेन भगवता अनिच्छन्त्येवाहमुपगूढा मन्दभागया पुनर्मया विमुखतैवावलम्बिता तदा प्रभृति गृहीतपश्चात्तापा विजृम्भितमदना आयल्लकं विरहस्यासहमाना अस्माद्दविरुद्धमप्यभिसरणलाघवमगणयित्वा आगतास्मि ।

---

१. 'दं' ख.
२. 'सर्वथा' ख.
३. 'ये । शिवदासः' ख.
४. 'पिबतं' ख.

कण्ठे गद्गदिकां तनोति वचनव्यापारसंरोधिनी-
मस्याः स्नेहरसप्रसङ्गमधुरा वाणीयमेणीदृशः ॥ ७७ ॥

देवी — (जनान्तिकम्) (क) सहि चन्दलेहे ! का णाम एसा जाए इत्थिआअणविरुद्धो आआरो ।

चन्द्रलेखा — (जनान्तिकम्) (ख) सहि एव्वं एदम् ।

अम्मकाण महिलाण किमण्णं
मण्णिमो पदमिदो लहुदाए ।
पेम्मभारविहलाण वि चित्तं
जं पआसइ पुरो पुरिसाणम् ॥ ७७ ॥

शिवदासः — (भिक्षुं प्रति)

पणअपराहीणाअं मइ भअवं किं तुवमुदासीणो ।
कुणसि ण कण्ठावेढं मुणालमुदुलेहि बाहूहिम् ॥ ७८ ॥

(उभे लज्जया मुखमवनमय्यान्योन्यमवलोकयतः ।)

राजा — (स्वगतम्) अहो ! अत्रातिक्रामति प्रसङ्गः ।

भिक्षुः — (स्वगतम्)

परीरम्भे कुम्भप्रतिभटकुचायाः कुतुकिनं
निरुन्धे मामग्रे मिषादिदमहो भूपतिसभम् ।
स्मरातप्तं चेतो न च मम विलम्बं विषहते
न विद्मः कर्तव्यं किमिति वयमस्मिन् व्यतिकरे ॥

(क) सखि चन्द्रलेखे ! का नामैषा यस्याः स्त्रीजनविरुद्ध आचारः ।

(ख) सखि ! एवमेतत् ।

अस्मादृशीनां महिलानां किमन्यन्मन्यामहे पदमितो लघुतायाः ।
प्रेमभारविह्वलानामपि चित्तं यत् प्रकाशयति पुरः पुरुषाणाम् ॥

(ग) प्रणयपराधीनायां मयि भगवन् ! किं त्वमुदासीनः ।
करोषि न कण्ठावेष्टं मृणालमृदुलाभ्यां बाहुभ्याम् ॥

१. 'ततां' ख.

शिवदासः — (भिक्षुं निर्वर्ण्य स्वगतम् )

यथा यथा मे निर्बन्धो जृम्भते परिरम्भणे ।
तथा तथास्य हृदयं शैथिल्यमवलम्बते ॥ ८१ ॥

तदेवं तावत् । (प्रकाशम् )

(क) बिम्बाहरं सरसपल्लवसोउमालं
दन्तक्खदेहि सुहआण सणाहमूलम् ।
सज्जट्ठिअं वि मह णिज्जिअजीवलोअं
मा मुञ्चिऊण विहलं कुण जम्मलाहम् ॥ ८२ ॥

उभे — (कर्णौ पिधाय) सन्तं सन्तं पापम् ।

भिक्षुः — (स्वगतं सनिर्वेदं) कथमेवंविधोऽयं प्रकारो युवतीनाम् ।

यथा शीतालूनां जनयति रुजं पावकशिखा
वियोगे योगे तु प्रबलपरितापं वितनुते ।
तथैवैषा योषित्प्रकृतिरपि कामाविलधिया-
मतो बीभत्सन्ते जगति युवतिभ्यः सुमतयः ॥ ८३ ॥

(इति व्याकुलस्तिष्ठति ।)

शिबदासः — (ग) भगवं ! किं अरण्णरुदिअं मह वअणम् ?

पेक्ख भिक्खुअ ! पढिल्लवरिल्लं
कुङ्कुमच्छुरणवड्ढिअसोहम् ।
मोहणं णवरकामिअणाणं
सज्जिअं तुह किए कुअजुग्गम् ॥ ८४ ॥

---

(क) बिम्बाधरं सरसपल्लवसौकुमार्यं दन्तक्षतैः सुभगानां सनाथमूलम् ।
सज्जस्थितमपि मम निर्जितजीवलोकं मा मुक्त्वा विफलं कुरु जन्मलाभम् ॥

(ख) शान्तं शान्तं पापम् ।

(ग) भगवन् ! किमरण्यरुदितं मम वचनम् ?
प्रेक्षस्व भिक्षुक ! प्रशिथिलवस्त्रं कुङ्कुमच्छुरणवर्धितशोभम् ।
मोहनं केवलकामिजनानां सज्जितं तव कृते कुचयुग्मम् ॥

देवी —(जनान्तिकम्) (क) सहि चन्दलेहे! अदो वरं पि किं सुणीअदि त्ति ण जाणामि।

चन्द्रलेखा —(विहस्य जनान्तिकम्) (ख) सहि! किं पेक्खीअदि त्ति भणाहि।

राजा —(सरोषम्) आः कुलटे! अपेहि तावत्।

स्थैर्ये सत्यपि विभ्यति क्षितिधरा जम्भारिदम्भोलितो
गाम्भीर्येऽपि सुधांशुदर्शनविधावम्भोनिधिर्जृम्भते।
क्षत्रस्य प्रभवन्ति तत्सहभुवो वेशाङ्गनाविभ्रमा
मोहायेति ममापि नाम पुरतो धृष्टं किमाचेष्टसे॥ ८५॥

शिवदासः —(स्वगतम्) कथं कुपितमनेन मदनकेतुना। तदेवं तावत्। (प्रकाशम्, राजानं प्रति सस्मितम्) (ग) महाराअ! अलमिदानीं संरम्भेण।

गण्डाहिण्डिअकुण्डलं रसवसामीलन्तणेत्तुप्पलं
सन्दट्ठाहरवल्लवं गळवळन्ताडिलधम्मिल्लअम्।
जाहिन्तो हि लहन्ति हन्त! सुहअं सम्भोअवीराइअं
तासु के परुसं भणन्ति पुरिसा रामासु वामासु वि॥ ८६॥

(क) सखि चन्द्रलेखे! अतः परमपि किं श्रूयते इति न जानामि।

(ख) सखि! किं प्रेक्ष्यत इति भण।

(ग) महाराज! अलमिदानीं संरम्भेण।

गण्डाहिण्डितकुण्डलं रसवशान्मीलन्नेत्रोत्पलं
सन्दष्टाधरपल्लवं गलवलदाशिथिलधम्मिल्लकम्।
याभ्यो हि लभन्ते हन्त! सुभगं सम्भोगवीरायितं
तासु के परुषं भणन्ति पुरुषा रामासु वामास्वपि॥

१. 'सस्मितं' ख.
२. र्ये च' क.
३. 'भवत्वेवं' ख.
४. 'प्रति—गण्डा' ख.

देवी — (जनान्तिकम् ) (क) चन्दलेहे ! एदं पुण जुज्जइ से वअणम् । किन्दु अजोग्गो इत्थिआणं मुहादो एदस्स णिग्गमो ।

चन्द्रलेखा — (ख) एव्वम् एदम् ।

कन्दोट्टकोमलदलाअदलोअण त्ति
दोग्घट्टकुम्भघणपीणपओहर त्ति ।
पुण्णेन्दुसुन्दरमुहि त्ति अ वण्णअन्ति
पेम्माउरा हि पुरिसाः परमम्मकाओ ॥ ८७ ॥

शिवदासः — (भिक्षुं प्रति) (ग) भअवं ! अलं सन्देहेण ।

जेणूसुएण रहुणाहसिलीमुहादो
कण्ठछिदा वि सहिआ दहअन्धरेण ।
तण्णाम वामणअणापरिरम्भसोक्खं
हत्थट्ठिअं पि अ विमुञ्चिअ वञ्चिदोऽसि ॥ ८८ ॥

(इति भिक्षुं हस्ते गृह्णाति ।)

भिक्षुः— (सविलक्षं हस्तमाक्षिपन् स्वगतम् )

---

(क) चन्द्रलेखे ! एतत् पुनर्युज्यतेऽस्या वचनम् । किन्तु अयोग्यः स्त्रीणां मुखादेतस्य निर्गमः ।

(ख) एवमेतत् ।

इन्दीवरकोमलदलायतलोचनेति
गजकुम्भघनपीनपयोधरेति ।
पूर्णेन्दुसुन्दरमुखीति च वर्णयन्ति
प्रेमातुरा हि पुरुषाः परमस्मादृशः ॥

(ग) भगवन् ! अलं सन्देहेन ।

येनोत्सुकेन रघुनाथशिलीमुखात्
कण्ठच्छिदापि सोढा दशकन्धरेण ।
तन्नाम वामनयनापरिरम्भसौख्यं
हस्तस्थितमपि च विमुच्य वञ्चितोऽसि ॥

अहो ! धृष्टतरमुपक्रान्तमनया ।

संसारभागललितानि यथेप्सितानि
भन्ये तथा न सुखयन्ति वशंवदानि ।
अस्याश्चिराभिलषितोऽपि शरीरसङ्गो
यन्मेऽधुना मनसि न प्रमदं तनोति ॥ ८९ ॥

(इति परावर्तते । )

शिवदासः — (उपसृत्य)

(क) दरसिढिलदुऊलं मेहलासिञ्जिदेहिं
मअणणिअमसाहं बाढमुग्घोसअन्तम् ।
मह जहणमणग्घं पेक्खमाणो समक्खं
ण हु विसहइ कामी को वि कालप्पडिक्खम् ॥ ९० ॥

(उभे सहसोत्तिष्ठतः । )

देवी — (सरोषं सभ्रूभङ्गं) (ख) साहु महाराअ ! साहु । एदाए वन्धईए चावलवअणाइ लालअन्तो चिट्ठदु महाराओ । सहि चन्दलेहे ! इदो दाव । (इति प्रस्थिता । )

राजा — (सक्रोधमुत्थाय) देवि ! मुहूर्तं तिष्ठ । (शिवदासं प्रति) आः पापे !

भूताविष्टेव कष्टं प्रलपसि पुरतो मादृशां नष्टलज्जा
कासि त्वं बन्धकीनामपि च कुचरितैर्मार्गमुल्लङ्घयन्ती ।

---

(क) दराशिथिलदुकूलं मेखलाशिञ्जितै-
र्मदननिगमशाखां बाढमुद्घोषयन्तम् ।
मम जघनमनर्घं प्रेक्षमाणः समक्षं
न खलु विषहते कामी कोऽपि कालप्रतीक्षाम् ॥

(ख) साधु, महाराज ! साधु । एतस्या बन्धक्याश्चापलवचनानि लालयंस्तिष्ठतु महाराजः । सखि चन्द्रलेखे ! इतस्तावत् ॥

---

१. 'चाडिलवरिद्धं' ख.

कामं सीमन्तिनी त्वं मम तु न सहते चापलं तावकीनं
कृत्तप्रत्यर्थिकण्ठच्युतरुधिरसुरावीरपाणः कृपाणः ॥ ९१ ॥

शिवदासः — (सस्मितम्)

(क) जहिं खु णिवडन्ति मे घणसिणेहगाढाअरं
मुणालवलओवमा उववदीण बाहालआ ।
तहिं किल गलन्तरे परुसरोसपोसाविलं
किवाणलदिआ वि दे वडउ णाम का मे गई ॥ ९२ ॥

भिक्षुः — (स्वगतम्) कष्टमतिचपलायास्तावदस्याः कृते शिवदासहितोपदेशं अवधीरितवानहं यदित्थमभिहितोऽस्मि तत्रभवता ('कासौ संसारसिन्धोः' इत्यादि पठति ।)

राजा — भगवन् विष्णुमित्र !

अमी वयं तावदनिन्द्यवृत्तयो
न बन्धकीधार्ष्ट्यमिदं सहामहे ।
उपक्रमं किन्तु रुणद्धि केवलं
भवन्मतस्याप्यनुवृत्तिरत्र नः ॥ ९३ ॥

भिक्षुः — राजन् सिंहलपते ! अलमस्मद्गतया शङ्कया । यथाभिमतमाचेष्टस्व । वयं तु —

एतस्या न तु केवलं तनुभृतां मुक्तिप्रतिद्वन्द्विनो
येऽस्मिन् जाग्रति सन्निधानपरुषा भावा भवाम्भोनिधौ ।

(क) यस्मिन् खलु निपतन्ति मे घनस्नेहगाढादरं
मृणालवलयोपमा उपपतीनां बाहालताः ।
तस्मिन् किल गलान्तरे परुषरोषपोषाविलं
कृपाणलतिकापि ते पततु नाम का मे गतिः ॥

१. 'केवलं चापलं ते' ख.
२. 'राजन्नलम' ख.
३. 'ननु' ख.
४. 'तामुक्ति' ग.

तेभ्यो विप्रतिबुद्धबुद्धिविलसत्तत्त्वा जुगुप्सामहे
किञ्चामी शिवदासशासनगिरश्चित्ते दृढीकुर्महे ॥ ९४ ॥

कीदृश्यस्ता इति चेच्छृणु । (क्वासावित्यादि पठति ।)

शिवदासः — (सहर्षं स्वगतम्) हन्त ! फलितमेव मे प्रयत्नेन मदनकेतोर्मनोरथेन च ।

राजा — भगवन् ! अपि स्थिरो निश्चयः ?

भिक्षुः — स्थिरतरः ।

शिवदासः — (सस्मितम्) (क) भअवं ! एत्थ जीवलोए कस्स सत्ती एव्वं भणिदुम् । जदो (संस्कृतमाश्रित्य)

उन्मीलद्दशनांशुजालविपुलालम्बस्स बिम्बाधर-
स्तच्चेन्दीवरगर्भपत्रसुभगं नेत्राञ्चलं चञ्चलम् ।
सा वा गद्गदसङ्गभङ्गुरपदा वाणी मनोहारिणी-
त्येकैकं युवधैर्यलोपि सुदृशामद्यापि विद्योतते ॥ ९५ ॥

अपि च—

अजिह्मगमुखोद्गलद्गरलबिन्दुसन्दूषितं
तदेतदपयःपयोनिलयफेनसंमिश्रितम् ।
अमन्दरपरिस्फुरद्विविधधातुधूम्रीकृतं
मनोज्ञमधरामृतं विजयते कुरङ्गीदृशाम् ॥ ९६ ॥

किञ्च —

एकस्याङ्के निहितवपुरप्यन्यमालोकयन्ती
चिल्लीवल्लीचलनकलया चापरं प्रीणयन्ती ।

---

(क) भगवन् ! अत्र जीवलोके कस्य शक्तिरेवं भणितुम् । यतः

---

१. 'कुर्महे । शिव' क.
२. 'वर्मणो म' ख.
३. 'कलिताल' ख.
४. 'मुखोल्लकद्ग', क.
५. 'मिश्रीकृतं', क.
६. 'धूम्रीभवन्म' क.
७. 'तनुर', ख.

नम्रालापैरमृतमधुरैरन्यमाह्लादयन्ती
नारीनाम्ना जयति हि जगन्मोहिनी कापि शक्तिः ॥

अथ च —

भिक्षुः — (सक्रोधम्) आः अलमलमसत्प्रलापेन चलहृदयानां मनःप्रक्षोभदक्षेण। तेषु का गणना विष्णुमित्रस्य। यस्य हि —

वाराङ्गनाजनविलासपलालजाल-
विप्लोषकर्मणि कृशानुशिखायते या।
सा योगवृत्तिरतिवृत्तरजस्तमस्का
निर्वाणवर्त्मघटनाय ममानुकूला ॥ ९८ ॥

शिवदासः — (भिक्षुं निर्वर्ण्य स्वगतम्) दिष्ट्या प्रशान्तः खर्वस्याभिषङ्गकलङ्कः। दिष्ट्या पुष्टश्च जनपदो मदनकेतोः। कुतः—

यस्य राज्ये प्रमाद्यन्ति विद्वांसोऽपि कदाचन।
तस्य राज्ञो जनपदो विनश्यति पदे पदे ॥ ९९ ॥

तदेतत् प्रकरणमुपसंहरामि। (प्रकाशम्) (क) भअवं विह्णुमित्त! किं परिचत्तह्मि तुम्हेहिम्?

भिक्षुः — न केवलमस्माभिरेव, त्वचापलपरिकोपितेन विधि-[2]नापि।

शिवदासः — (ख) तदो किम्?

भिक्षुः —

आतन्वन्तु ललाटिकां मृगमदैः कालाञ्जनेनाक्षिणी
संस्कुर्वन्तु कपोलयोर्विदधतां चित्राणि पत्राणि च।

---

(क) भगवन् विष्णुमित्र! किं परित्यक्तास्मि युष्माभिः?
(ख) ततः किम्?

---

१. 'भिक्षुः—आः' क.
२. 'विधिनापि। कुतः—आतन्वन्तु' ख.

आक्षिम्पन्तु च कुङ्कुमेन कुचयोर्द्वन्द्वं कुरङ्गीदृशः
काम दैवहतासु तासु न रतिं पुष्णाति यूनां मनः ॥ १०० ॥

शिवदासः — (क) होदु एव्वम् । अह्माणं पुण परमं दव्वं भअवं कुसुमाउहो । सो उण अह्मे ण मोच्छिहिइ । एव्वं च—

विरलचिउरभारा होदु सुण्णेक्ककण्णा
विसमकुअजुआ वा किञ्च तुङ्गोअरी वा ।
णवरकुसुमबाणो होइ जिस्सा सहावो
जअइ भुवणचक्कं सा खु एक्का मिअच्छी ॥ १०१ ॥

अहव अलं दुव्विवादेण । अपि मए गन्तव्वम् ?

भिक्षुः — गच्छ गच्छ यथेच्छं गच्छ ।

(नैपथ्ये)

हा हा हतोऽस्मि ।

अखिलभुवनबन्धोर्योगविद्याविनोद-
प्रकटितजगदण्डव्याप्तेस्साम्प्रतं ते ।
कथमगणितपूर्वस्सर्वलोकाधिदायी
समजनि परिणामः कष्टमेवंविधोऽयम् ॥ १०२ ॥

---

(क) भवत्वेवम् । अस्माकं पुनः परमं दैवं भगवान् कुसुमायुधः । स पुनरस्मान् न मोक्ष्यति । एवञ्च—

विरलचिकुरभारा भवतु शून्यैककर्णा
विषमकुचयुगा वा किञ्च तुङ्गोदरी वा ।
केवलकुसुमबाणो भवति यस्याः सहायो
जयति भुवनचक्रं सा खल्वेका मृगाक्षी ॥

अथवा अलं दुर्विवादेन । अपि मया गन्तव्यम् ?

---

१. 'अक्कं' ख.

(सर्वे विषादं रूपयन्ति ।)

शिवदासः — (स्वगतम्) अये जम्भकस्यायं स्वरः । लताकुञ्जगूढनिक्षिप्तमपि मम कलेबरमनेनावलोकितं भविष्यति । (विचिन्त्य) इदमपि शोभनं जातं यतोऽमीषां मयि विस्रम्भस्य प्रकारो विज्ञायते ।

(ततः प्रविशति शिवदासकलेबरमुद्वहन् जम्भकः । हा[1] हतोऽस्मि अखिलेत्यादि पूर्वोक्तमेव पठन् । राज्ञः पुरतो निपतति ।)

राजा — (दृष्ट्वा सकरुणम्) हा[2] सखे शिवदास ! । (इति मोहमुपगतः ।)

भिक्षुः — हा महोपकारिन् ! हा मम सन्मार्गोपदेशदेशिक ! हा निखिलयोगविद्यानिधे ! हा निष्कारणवत्सल ! क्वासि । देहि मे प्रतिवचनम् ।

देवी — (सास्रम्) (क) महाराअ ! समस्ससिहि समस्ससिहि ।

चन्द्रलेखा — (सबाष्पम्) (ख) हा एव्वं मं मनोरहाणं वि अगोअरं पदं आरोविअ परलोअं गदोऽसि ।

राजा — (समाश्वस्य)

स्वार्थं सन्त्यजतः परार्थघटनव्यापारनिष्ठस्य ते
कष्टं निष्ठुरमीदृशं कृतवता दैवेन किं दुष्करम् ।
कल्याणिन् शिवदास ! वासवपुरे स्वाद[3]शैरद्भुतै-
र्देवानामपि सम्मदं प्रबलयन् किञ्चित् प्रतीक्षस्व नः ॥

---

(क) महाराज ! समाश्वसिहि, समाश्वसिहि ।

(ख) हा ! एवं मां मनोरथानामप्यगोचरं पदमारोप्य परलोकं गतोऽसि ।

---

१. 'हा हतोऽस्मीत्यादिपूर्वोक्तमेव पठति, राज्ञः पुरः पतति च' ख.

२. 'हा शिव' ख.

३. 'सभै' क.

(इति [1]नर्मूर्च्छति)

भिक्षुः — सिंहलपते! समाश्वसिहि समाश्वसिहि।

शिवदासः —(स्वगतं स[1]स्नेहास्रम्) अहो! मयि महानमीषां पक्षपातः। तदनुचितः कालक्षेपः। (प्रकाशम्) (क) देवि सिङ्गारमञ्जरि! अदिविसमो एत्थ दसापरिणामो। ता अदो वरं अभूमी अह्माणम्। (भिक्षुं प्रति) भअवं! किं तुवं पि सिवदासं अणुसोचसि। तुह णेण किं उपकिदम्?

भिक्षुः — [4]आः कठिनहृदये! किं प्रलपसि?

येन मे चपलकर्मकर्मठं
मानसं समनुकृष्य कापथात्।
अस्तचन्द्रमपुनर्निवर्तने
वर्त्मनि द्रढयता नु किं कृतम्॥ १०४॥

शिवदासः—(ख) एव्वं होदु (इति निष्क्रान्तः।)

राजा—(समाश्वस्य) भगवन् विष्णुमित्र! अलमलं विलम्बेन।

यत्प्रसादविभवाद् गरीयसो
दुर्लभानधिगता मनोरथान्।

---

(क) देवि शृङ्गारमञ्जरि! अतिविषमोऽत्र दशापरिणामः। तदतः परमभूमिरस्माकम्। भगवन्! किं त्वमपि शिवदासमनुशोचसि। तवानेन किमुपकृतम्?

(ख) एवं भवतु।

---

१. 'सस्नेहार्द्रं' ख.

२. 'ननयोः क.

३. 'सोचसि। भिक्षुः' — ख.

४. 'धिक् कठिनहृदये— येन' ख.

५. 'नु' ख.

६. 'निष्क्रान्तः' क.

तद्दिनाक्षमनुभूय वर्तितुं
न स्त्रियो न च कृतद्रुहो वयम् ॥ १०५ ॥

भिक्षुः—सिंहलपते! कथं नाम दीनानुकम्पी तत्रभवानुपेक्ष्यते। येन हि 'क्वासौ संसारसिन्धोः' इत्यादिनैव[1] संसारगर्तादुत्तारितोऽस्मि।

राजा—तदेवंभूतस्याप्यस्य परिष्वङ्गमहोत्सवमनुभूय पश्चा[3]देनमनुसरामि। (इति शिवदासशरीरमालिङ्गति।)

(ततः प्रविशति स्वशरीरमाविशञ्छिवदासः, उत्तिष्ठति।)

(सर्वे सविस्मयं पश्यन्ति।)

राजा—(सहर्षम्) सखे शिवदास!

माया किंन्नु किमिन्द्रजालमथवा निद्रामि जागर्मि वा
यद्वासौ रजनी किमेष दिवसः केऽमी समीपे मम।
आनन्दामृतवारिराशिलहरीसञ्चारपारिप्लवं
चेतः श्रेयसि सम्मुखेऽपि नहि मे विश्वासमद्याश्नुते ॥१०६॥

भिक्षुः—यत्सत्यमसम्भाव्यत्वादीदृशस्य श्रेयसो वयमपि न विश्वसिमः।

शिवदासः—सर्वे विगतसम्भ्रममुपविशन्तु। पश्चात्सर्वमावेद्यते। (सर्वे तथा कुर्वन्ति।)

(नैपथ्ये)

(क) हाँ मुसिदाह्मि।

---

(क) हा! मुषितास्मि।

---

१. 'दिना खलु सं' ख.
२. 'सागरादु' ख.
३. 'दनु' क.
४. 'किंन्वियमि' ख.
५. 'मावेदयिष्यामि' ख.
६. 'तथेत्युपविशन्ति' ख.
७. 'हा हा' ख.

राजा—(आकर्ण्य) जम्भक! ज्ञायतां किमेतदिति।

जम्भकः—(निष्क्रम्य प्रविश्य)

अनङ्गलेखां व्यसुमुद्वहन्ती
मुहुः पतन्ती मुहुरालपन्ती ।
मुष्ट्या निजोरः परिघट्टयन्ती
सा कुट्टिनी सत्वरमभ्युपैति ॥ १०७ ॥

भिक्षुः—(स्वगतम्) मत्परिभवफलं स्वयमनुभवतु पापाशया । अथवा शान्तम् । अपत्यविपत्तिसम्भवश्शोको दुर्निवारस्संसारिभिः ।

(प्रविश्य यथानिर्दिष्टा कुट्टिनी भिक्षोः पुरतः पतन्ती ।)

कुट्टिनी—(क) हदास! संपुण्णा दे मनोरहा ।

पत्थिज्जमाणा वि णिअंबिणीओ
ण होन्ति जाणं अणुऊलभावा ।
ते णाम दोब्भग्गहआ जुवाणो
ण णिट्ठुरं कम्म कुणन्ति एव्वम् ॥ १०८ ॥

भिक्षुः—कथमयमस्मासु पातितोऽशनिर्दैवेन ।

कुट्टिनी—(सास्रं राजानं प्रति) (ख) महाराअ! परित्ताआहि परित्ताआहि मे वराइं दुहिअं जा खु महाराअसआसादो पडिणिअत्तन्ती एव्व एरिसं दसं सम्पत्ता ।

---

(क) हताश! संपूर्णास्ते मनोरथाः ।

प्रार्थ्यमाना अपि नितम्बिन्यो
न भवन्ति येषामनुकूलभावाः ।
ते नाम दौर्भाग्यहता युवानो
न निष्ठुरं कर्म कुर्वन्त्येवम् ॥

(ख) महाराज! परित्रायस्व परित्रायस्व मे वराकीं दुहितरं या खलु महाराजसकाशात् प्रतिनिवर्तमानैव ईदृशीं दशां संप्राप्ता ।

---

१. 'हताशा' ख.

२. 'कथमस्मासु' ख.

३. 'साक्रन्दम्' ख.

राजा—सखे शिवदास! पूर्वं किल भवता भुजङ्गमुखादियं परित्राता। अथेदानीमस्याः कोऽयं विपत्तिहेतुः?।

शिवदासः—विधिविलसितानि को नाम परिच्छिनत्ति।

देवी—(क) अय्य शिवदास! विज्जाबलेण पुणो वि णं जीवावेहि।

शिवदासः—(स्वगतम्) तद्यावत्तिर्यक्प्रणिहितेन जीवितेनैतां प्रत्युज्जीवयामि। (इति ध्यानं नाटयति।)

(अनङ्गलेखा अक्षिणी उन्मील्योत्तिष्ठति।)

कुट्टिनी—(सहर्षम्) (ख) एहि वच्छे! आलिङ्गेहि मम्।

अनङ्गलेखा—(ग) अम्ब! चिरं पसुत्तम्हि। (राजानं दृष्ट्वा) कहं महाराओ। जेदु महाराओ।

राजा—भद्रे! कल्याणिनी भूयाः।

अनङ्गलेखा—(देवीमुपेत्य) (घ) अवि सुहम्?

देवी—(ङ) दाणीम् सुहम्। पुव्वं उण इत्थिआअणविरुद्धं बहुप्पलवन्तीए तुए चिरं कदत्थिदम्हि।

(क) आर्य शिवदास! विद्याबलेन पुनरप्येनां जीवय।

(ख) एहि वत्से! आलिङ्ग माम्।

(ग) अम्ब! चिरं प्रसुप्तास्मि। कथं महाराजः! जयतु महाराजः।

(घ) अपि सुखम्?

(ङ) इदानीं सुखम्। पूर्वं पुनः स्त्रीजनविरुद्धं बहुप्रलपन्त्या त्वया चिरं कदर्थितास्मि।

१. 'विषधरविषादियं' ख.

२. 'को विपत्ति' ख.

३. 'एदं' ख.

४. 'तेनैतज्जीवितेनैनां' ख.

५. 'हि—अन' क.

६. 'तुए कदत्थिम्हि' ख.

अनङ्गलेखा—(सभयम्) (क) अह काए तह पलविअम्?

देवी—(ख) णं तुए ।

अनङ्गलेखा—(ग) कहं देवी एव्वं असङ्गअं भणादि ?

राजा—अयि धूर्ते! किमसङ्गतं नाम ।

परिषदि भगवन्तं विष्णुमित्रं प्रतीमं
वचनमचकथस्त्वं तादृशं वीतलज्जा ।
युवतिषु पुरुषाणां यादृशेनापतेयु-
[1]र्जगति ननु मनांसि द्वेष[2]वैराग्यवन्ति ॥ १०९ ॥

अनङ्गलेखा—(सविषादम्) (घ) पुव्वं अत्थाणमण्डवे[3] अय्यसिवदासं दट्ठूण पडिणिव्वुत्तमत्ताए[4] मए पसुत्तं दाणिं पुण पबुद्धं[5] ति एत्तियं जाणामि ।

भिक्षुः—राजन्! अलं निर्बन्धेन । अलीकभाषणपरायणैः[6] किं दुर्वचनं नाम ।

शिवदासः—अलं विकल्पितेन । श्रूयतां स्वपरिजनेन महाराजेन ।

राजा—अवहितोऽस्मि ।

---

(क) अथ कया तथा प्रलपितम्?

(ख) ननु त्वया ।

(ग) कथं देवी एवमसङ्गतं भणति ?

(घ) पूर्वमास्थानमण्डपे आर्यशिवदासं दृष्ट्वा प्रतिनिवृत्तमात्रया मया प्रसुप्तमिदानीं पुनः प्रबुद्धमित्येतावज्जानामि ।

---

१. 'ननु जगति' ख.

२. 'पोषाविलानि' ख.

३. 'मण्डवे सिव' क,

४. 'णिवत्तमाणाए' ख.

५. 'पबुद्धं—भिक्षुः' क.

६. 'निरतैः' ख.

शिवदासः —

भूमौ यत् किल सञ्चिनोति दुरितं धर्म्यात् पथः प्रच्युतो
लोकस्तत् खलु भूपतौ परिणमत्यम्भो यथाम्भोनिधौ ।
इत्यालोच्य हिताय ते यतिममुं दुर्मार्गपातोन्मुखं
तत्त्वं बोधयितुं भवाब्धिजलधेरेष प्रयत्नो मम ॥ ११० ॥

स कीदृशश्चेदेवमिव ।

(सर्वे सहर्षविस्मयबहुमानं शिवदासं पश्यन्ति ।)

भिक्षुः—(स्वगतम्) निष्प्रतिक्रियोऽयं प्रयत्नप्रपञ्चस्तत्रभवत-शिवदासस्य । अथवा —

निर्व्याजनिर्मलधियां विधुरेषु मन्ये
वीताभिसन्धिकणिकः करुणानुषङ्गः ।
किं चातका विदधते हितमम्बुदेभ्यः
सन्तर्पयन्ति किममून् हि ते पयोभिः ॥ १११ ॥

(उत्थाय सप्रश्रयम्) आचार्य! अयं विष्णुमित्रोऽभिवादयते ।

(इति शिवदासस्य पादयोः पतति) ।

शिवदासः — शान्तं शान्तं पापम् । अलमनुचिताचरणेन ।

(इति तमुत्थापयति ।)

राजा — दिष्ट्या भवत्प्रसादेन महतः संसारगर्तादुत्तारितोऽयं भगवान् विष्णुमित्रः ।

शिवदासः — अयं हि युवराजस्य मदनवर्मणः प्रसादः ।

राजा — (सोल्लासम्) कथमिव ।

शिवदासः — एवमिव ।

---

१. 'मम । कीदृश' क.
२. 'प्रपञ्चश्शिव' ख.
३. 'लोके' ख.
४. 'किममूर्नयते पयोभ्यः' ख.
५. 'शान्तम् । अल' क.
६. 'प्रसादेन संसार' ख.
७. 'सोल्लासं अथ कथ' क.

राजा — (सस्नेहहासम्) साधु[1] साधु कुमार मदनवर्मन्! साधु। साधुदर्शिनी ते बुद्धिः।

मोहातिरेकेण बहुप्रमादा
वयं त्वया धर्मदशाभिगुप्ताः।
अतश्चिरं चन्द्रमरीचिशुभ्रैः
प्रसाधयन् जीव जगद्यशोभिः ॥ ११२ ॥

देवी (क) सहि चन्दलेहे! अणवरद्धा खु[2] एसा तवस्सिणी अणङ्गलेहा।

राजा — सखे शिवदास! महत्प्रियमनुष्ठितं भवता तत्पुनरप्येवमेव भवत्सहासिकोत्सवाय[3] स्पृहयामः। कुतः—

आयुर्नाम नृणां दिनानि कतिचित्सौदामिनीचञ्चलं
नामी मान्ति मनोरथास्त्रिभुवने सिद्धेष्वनास्थापराः।
धन्यस्तावदयं क्षणः सहृदयैः[4] सार्धं प्रसन्नोत्तरैः
संलापामृतपाननिर्वृतधिया लोकेन यो नीयते ॥ ११३ ॥

भिक्षुः — राजन् सिंहलपते! आचार्य शिवदास!

उभौ — आज्ञापयतु भगवान्।

भिक्षुः — तद्यावदिदानीम्—

पुण्यानां पुलिनस्थलानि सरितां जुष्टानि वैखानसैः
कान्ताराण्युपशान्तसत्त्वकलहप्रस्तावरम्याणि च।
नित्यावर्तितवेदशास्त्रमुखरब्रह्माणि देवालया-
न्यासेवेमहि जीवलेपनिगलच्छेदाय मोदाय च ॥ ११४ ॥

---

(क) सखि चन्द्रलेखे! अनपराद्धा खलु एषा तपस्विन्यनङ्गलेखा।

---

१. 'साधु कुमार साधु कुमार साधुदर्शिनी' ख.

२. 'खु तव' क.

३. 'भवत्सहवासमहोत्सवाय' ख.

४. 'सहृदयैः' इत्यत आरभ्य 'अश्रान्तम्' इत्येतदन्तो ग्रन्थो न दृश्यते 'क' पाठे. पत्रमेकं च गलितम्।

उभौ — भगवन् ! एवमस्तु । सन्तु च शिवास्ते पन्थानः ।

शिवदासः — राजन् सिंहलपते ! किं ते भूयः प्रियमुपहरामि ।

राजा —

देव्या निर्व्याजरम्यैरियमुपचरणैर्नन्दिता चन्द्रलेखा
संसारावर्तगर्तादयमपि भगवानुद्धृतो विष्णुमित्रः ।
ब्रह्मत्राणेन नीतो मम हि जनपदस्साम्प्रतं पुष्टिमिष्टा-
मन्यत् किं धन्यजन्मन् ! प्रियमधिकमतः प्रार्थयेऽहं कृतार्थः
॥ ११५ ॥

तथापीदमस्तु

(भरतवाक्यम्)

भूदेवाश्चतुरोऽपि चञ्चलधियामात्तश्रमानाश्रमा-
नश्रान्तं परिपालयन्तु विधिवत्संसारबन्धच्छिदः ।
राजानश्च महीमहीनविभवा रक्षन्तु लक्ष्मीपति-
क्रोडाधीशविशालदन्तशिखरक्रीडारसज्ञामिमाम् ॥ ११६ ॥

(इति परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति मदनकेतुचरितं नाम प्रहसनं समाप्तम् ॥

---

प्रहसनलक्षणलेशैः स्पृष्टं चेद् प्रहसनाभिधां लभताम् ।
नो चेत्पुनरन्यदिदं विनोदनं पाणिवादस्य ॥

शुभमस्तु ।

---

श्रीनारायणगुरवश्चरणजुषे रामपाणिवादाय ।
... शान्तमतयः प्रतिभां विद्वत्समासेव्याम् ॥
... तार्णवौर्ववह्नी गुरुचरणावरुणाम्बुजन्मशोणौ ।
... नयावनम्रमूर्ध्ना प्रतिदिनमेष हि रामपाणिवादः ॥
नारायणाभिधानं किमपि परं ब्रह्म सकलजनवन्द्यम् ।
द्रढयति मनसि नितान्तं शान्तमती रामपाणिवादोऽयम् ॥

---

१. 'पाणिघातस्य' ख.

२. 'श्रीनारायण' इत्याद्यास्त्रयः श्लोकाः ख. पाठे न दृश्यन्ते ।

MUL
160552
160552
36832
015:2L401:1
UNIVERSITY LIBRARY
NOV 1953

## श्लोकानुक्रमणिका ।


| | पृष्ठम् | श्लोकः |
|---|---|---|
| अक्षस्रजा गणयतीव | २७ | ४७ |
| अखिलभुवनबन्धोः | ४७ | १०२ |
| अजिह्मग० | ४५ | ९६ |
| अणुराय० | ३० | ५६ |
| अनङ्गलेखाम् | ५१ | १०७ |
| अनङ्गलेखाधर० | २४ | ३९ |
| अपि विशन्ति | ३३ | ६६ |
| अभिवारिधि | ३१ | ५९ |
| अमी वयम् | ४४ | ९३ |
| अम्बरं विगतमेघ० | ३५ | ७१ |
| अम्मकाण० | ३९ | ७८ |
| अवतरतु धरित्रीमेव | १५ | २५ |
| अष्टाङ्गब्रह्मचर्या० | २९ | ५२ |
| असावसाधारण० | ३५ | ७० |
| अस्मिन् ब्रह्माण्डखण्डे | ११ | २० |
| अहो चित्रं चित्रम् | १६ | २६ |
| अहो महाराज! | २४ | ४१ |
| आतन्वन्तु | ४६ | १०० |
| आयुर्नाम नृणाम् | ५१ | ११३ |
| आवृत्तिशून्यां पदवीम् | ४ | ८ |
| आस्थानमेतदखिलम् | २४ | ४२ |
| उत्कण्ठापरिपाण्डु० | २५ | ४३ |
| उन्मीलद्दशनांशु० | ४५ | ९५ |
| एकस्याङ्के | [illegible] | ९७ |
| एतस्या न तु | ४४ | ९४ |
| कनकशिखरी | २९ | ५३ |
| कन्दोट्ट० | ४२ | ८७ |
| कर्णाकर्णिकया | १७ | २८ |
| कर्णौ चिरेण | ३८ | ७६ |
| कष्टं कष्टम् | ३४ | ६८ |
| कामं तया खलु | १५ | २३ |
| कुट्टिन्या | १२ | २२ |
| कुलं वा शीलं वा | २३ | ३७ |
| केतकीकुसुम० | १९ | ३२ |
| केलिस्नान० | २२ | ३६ |
| कासौ संसारसिन्धोः | ३१ | ६० |
| गण्डाहिण्डिअकुण्डलम् | ४१ | ८६ |
| गात्रे वेपथु० | ३८ | ७७ |
| गुरुतरदुरितार्णव० | ५६ | ११६ |
| चापल्यस्य परां | २३ | ३८ |
| जननयनचकोरी० | १७ | २९ |
| जखिं खु | ४४ | ९२ |
| जीवातुर्मे | २७ | ४६ |
| जेणूसुएण | ४२ | ८८ |
| तन्मे ब्रह्म परम् | २९ | ५१ |
| दम्पत्योरितरेतर० | २१ | ३४ |
| दरसिढिलदुऊलम् | ४३ | ९० |
| देवीविरोधमनुशङ्कय | १९ | ३१ |
| देव्या निर्व्याज० | ५६ | ११५ |
| द्रमिडविषये | ८ | १५ |

| | पृष्ठम् | श्लोकः |
|---|---|---|
| न्द्वन्द्वंव सुन्दरि ! | १८ | ३० |
| नारायणाभिधानम् | ५६ | १२० |
| नालं मे | २८ | ४९ |
| नाहं ते कुचकुम्भयोः | १ | १ |
| निम्नं क्वाप्युन्नतम् | २९ | ५४ |
| निद्रे देवि ! | ३ | ६ |
| निर्वाणाप्यनिलेन | ३६ | ७२ |
| निर्व्याजनिर्मलधियाम् | ५४ | १११ |
| नीरन्ध्रध्वान्त० | ६ | १० |
| पणयपराहीणाअम् | ३९ | ७९ |
| परिभिज्जमाणा | ५१ | १०८ |
| परमं दैवतम् | ९ | १८ |
| परिषदमाराधयितुम् | ३ | ५ |
| परिषदि भगवन्तम् | ५३ | १०९ |
| परीरम्भे | ३९ | ८० |
| पाटीरपङ्क० | ३२ | ६३ |
| पुण्यानां पुलिनस्थल नि | ५५ | ११४ |
| पुरुषान् परुषानपि | २९ | ५५ |
| पूर्वं तावदनङ्ग० | ३१ | ६१ |
| पेक्ख भिक्खुअ० | ४० | ८४ |
| प्रत्यक्षदृष्टनिज० | २२ | ३५ |
| प्रत्यङ्गमङ्गनायाः | ११ | २१ |
| प्रहसनलक्षणलेशैः | ५६ | ११७ |
| प्रेङ्खच्चामर० | ३२ | ६४ |
| प्रेङ्खत्काञ्चन० | ७ | १४ |
| प्रेमा नाम | २० | ३३ |
| प्रेयस्सु प्रकटित० | १५ | २४ |
| प्रोदञ्चत्किलि० | २३ | ३८ |
| बिम्बाहरम् | ४० | ८२ |
| भवत्वक्ष्णा काणो | २६ | ४५ |
| भावावेशास्निग्धतारा० | ३६ | ७३ |
| भिन्नाकर० | ३३ | ६७ |
| भूताविष्टेव कष्टम् | ४३ | ९१ |
| भूदेवाश्चतुरोपि | ५६ | ११६ |
| भूमौ यत् किल | ५४ | ११० |
| ममायमर्थः प्रायेण | १६ | २ |
| मयणविलास० | २८ | ५० |
| माया किन्तु | ५० | १०६ |
| मुक्ताजालैः | २ | ३ |
| मुहुर्वलितकन्धरम् | २८ | ४८ |
| मोहातिरेकेण | ५५ | ११२ |
| यत्प्रसादविभवात् | ४९ | १०५ |
| यथा शीतालूनाम् | ४० | ८३ |
| यथा यथा मे | ४० | ८१ |
| यद्यपि | ३७ | ७४ |
| यस्य राज्ये | ४६ | ९९ |
| यूथिका भजतु | २५ | ४४ |
| यूनि स्त्रीणाम् | ३८ | ७५ |
| ये गृह्णन्ति | २ | ४ |
| येन मे | ४९ | १०४ |

| | पृष्ठम् | श्लोकः | | पृष्ठम् | श्लोकः |
|---|---|---|---|---|---|
| ये नाम केचन | २४ | ४० | श्रीनारायणगुरवः | ५६ | ११८ |
| योगिनि वा | १ | २ | श्रीमद्भैरवपाद० | १० | १९ |
| राजानो | ७ | १३ | सद्यःकृत्त० | ८ | १६ |
| राजापचारो | ३४ | ६९ | सरस्तीरारामे | ३२ | ६२ |
| राज्ये सिंहल० | ९ | १७ | सैवेयम् | १७ | २७ |
| लिप्यन्तां मणिकुट्टिमाः | ६ | ११ | संसारभागललितानि | ४३ | ८९ |
| वसानः काषायम् | ३ | ७ | स्त्रीमूलस्योपतापस्य | ३३ | ६५ |
| वाराङ्गनाजन० | ४६ | ९८ | स्थैर्य सत्यपि | ४१ | ८५ |
| वारिराशिपरिखा० | ३० | ५८ | स्वार्थं सन्त्यजतः | ४८ | १०३ |
| विरलचिउरभारा | ४७ | १०१ | हरिचन्दनशीतलैः | ३० | ५७ |
| वीथ्यामस्याम् | ५ | ९ | | | |


UNIVERSITY LIBRARY
6 - NOV 1957
MADRAS
MUL
160552

21 JUN 1955